वर्षम्-३

अङ्कः-१२

# संस्कृतवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

युगाब्दः ५११२-१३ वैक्रमाब्दः २०६७-६८ चैत्र-कृष्ण १३ - आषाढ-कृष्ण १४ शकः १९३३ अप्रैल - जून २०११

## कुलपतिवाक्

संस्कृतवार्ताया अस्मिन् अङ्के भारतस्य महामहिमराष्ट्रपतिना सम्मानितानां विदुषां वृत्तं प्रकाशितम्। प्रतिवर्षं पञ्चदशप्रायाः भारतीयाः पण्डिताः संस्कृतशास्त्रपरम्परापारावारपारीणाः राष्ट्रपतिसम्मानेन सभाजिता भवन्ति। विगतयोर्द्वयोः वर्षयोः एष सम्मान एकस्मै वैदेशिकसंस्कृतपण्डितायापि प्रदीयते। कोलम्बियाविश्वविद्यालये प्राध्यापकः संस्कृतसाहित्यधुरन्धरो महापण्डितः शेल्डानपोलोकः ऐदम्प्राथम्येन अमुं सम्मानं प्राप्नोत्। गतवर्षस्य कृते हङ्गेरिदेशीयो बहुश्रुतः शास्त्रविशारदः आचार्यः तोत्तोशिः राष्ट्रपतिसम्मानाय चितः। मया राष्ट्रपतिसम्मानभाजः सर्वे पण्डिताः वर्धापनपत्रेणाभिनन्दिताः। अयञ्च तोत्तोशिवर्यो मदीयपत्रस्य संस्कृते निबद्धं स्वं प्रत्युत्तरमिदं प्रैषयत्-

*"स्वस्ति। बुदपेष्टपुरवासी तोत्तोशिनामकः श्रीमतः संस्कृताद्यनेकविद्याविनयराजमानाञ्छ्रीत्रिपाठिराधावल्लभाख्यान् विज्ञापयति यद् भवल्लिखित-पत्रगतकल्याणवचनेन परमनुगृहीता वयम्। 1956 ख्रिस्ताब्दे गीर्वाणभाषाध्यापनं हङ्गेरिदेशे प्रतिष्ठाप्य षट्चत्वारिंशत्संवत्सरा अस्माभिः संस्कृतव्याकरण-काव्येतिहासाद्युपदेशेन परिगमिताः। भारतदेशजशिष्टादिष्टविद्या अस्मच्छिष्यैः स्वधीता इति परितुष्टाः स्मः। शमिह भावत्कं भव्यमनुदिनमेधमानमाशास्महे।*

*2011 ख्रिस्ताब्दे पञ्चममासस्य सप्तदशे वासरे।"*

अनेन पत्रेण कीदृशी वैदेशिकपण्डितानां संस्कृतं प्रति निष्ठा, कीदृशोऽध्यवसायः इति ज्ञातुं शक्यते। संस्कृतदूर्वा निखिले धरणीतलेऽनवरतं प्ररोहतीत्यपि प्रत्ययं प्राप्य शक्यमुच्छ्वसितुम्।

**दूर्वा न म्रियते**

उपरिलिखितेन स्मर्यते ऊनविंशशतकसम्बद्धः कश्चन प्रसङ्गः। शतकेऽस्मिन् ब्रिटिशशासनेन भारतभुवमास्कन्दता नवीना शिक्षानीतिः घोषिता। मैकालेमहोदयो नवीननीत्या भारतीयानां नव्यमानसिकदासतां प्रगुणयितुं दारुणमुपक्रान्तवान्। ब्रिटिशशासनेनापि संस्कृतध्वंसकरी तदीया शिक्षानीतिः स्वीकृता। तमेतं सर्वकारस्य संस्कृतौ कुठाराघातसदृशम् उपक्रमं संलक्ष्य उद्वेजिताः संस्कृतपण्डिताः। कलिकातानगर्याः संस्कृतमहाविद्यालये तेषां सभा अभवत्। सभायां ते पण्डिता इत्थं निश्चिन्वन्ति स्म-संस्कृतविद्याविशारदः भगवद्गीतायाः भाषान्तरकारः संस्कृताङ्ग्लकोशप्रणेता सुधीः श्रीमान् होरेसविल्सन्नामा पण्डितः पत्रेण सूचनीयः। कदाचित् तेन प्रत्यायिता गोरण्डा दुरुद्यमं त्यजेयुरिति विचार्य पण्डितैः प्रेरितः प्रेमचन्द्रवर्यः १८३५ तमे वत्सरे संस्कृतेन निबद्धं छन्दोमयं विस्तृतं पत्रं विल्सन्महोदयाय विसृष्टवान्। तत्र आसीदिदं छन्दः-

**गोलश्रीदीर्घिकाया बहुविटपितटे कालिकातानगर्यां**<br>
**निःसङ्गो वर्तते संस्कृतपठनगृहाख्यः कुरङ्गः कृशाङ्गः।**<br>
**हन्तुं तं धीरचित्तं विधृतखरशरो मैकले-व्याधराजः**<br>
**साश्रु ब्रूते स भो भो ( सु? ) विलसनमहाभाग मां रक्ष रक्ष॥**

सहृदयहृदयः पण्डितप्रवरो विल्सन्वर्यः संस्कृतेन पत्रमिदं उत्तरयन् अन्ते इदं लिलेख-

**निष्पीड्यापि परं पदाहतिशतैः शश्वद् बहुप्राणिनां**<br>
**सन्तप्तापि करैः सहस्त्रकिरणेनाग्निस्फुलिङ्गोपमैः।**<br>
**छागाद्यैश्च विचर्वितापि सततं भ्रष्टापि कुद्दालकै-**<br>
**र्दूर्वा न म्रियते कृशापि नितरां धातुर्दया दुर्बले॥**


राष्ट्रियसंस्कृतसंस्थानम् आगामिनि वर्षे जनवरीमासे विश्वसंस्कृतसम्मेलनमायोजयति यस्मिन् सहस्त्रप्रायाः भारतीया वैदेशिकाश्च संस्कृतपण्डिताः स्ववैदुषीं प्रकटीकरिष्यन्ति प्रत्यग्रां च विधास्यन्ति अधीतिं स्वीयां स्वीयाम्। अस्मिन् प्रत्यासन्ने महदुपक्रमे प्रक्रान्ते च पौरस्त्य-प्रतीच्यसंवादे एतादृशाः प्रसङ्गा नूनं प्रेरणास्पदं भवन्ति नः।

**अहह कष्टमपण्डितता विधेः**

संस्कृतवार्ताया अस्मिन् अङ्के मुद्रणस्थे सति अत्यन्तं क्लेशकरी प्राणहरीव कापि वार्ता सम्प्राप्ता। निखिलेऽस्मिन् भारतभूमण्डले संस्कृतसमाजस्य नेता, विजेता माधुर्य-दाक्षिण्य-सौहार्दादिसद्गुणैः सकलसहृदयानां सहसा दिवं प्रयातो धीमान् कृतिमान् श्रीमान् वाचस्पतिरुपाध्यायः। तं विना उपहतेव भाति संस्कृतनन्दनवनश्रीः। राष्ट्रियसंस्कृतसंस्थानस्य विकासे आसीत् तस्य महनीया भूमिका। तदीयमवदानं तत्कृतं मार्गदर्शनं सौजन्यं च सदैव सकार्तज्ञं स्मरिष्यामः।

संस्कृतसप्ताहमहोत्सवावसरे रक्षाबन्धनपर्वणश्च कृते सर्वेभ्यः मङ्गलकामनाः।

*-राधावल्लभः त्रिपाठी*




नवदेहल्यां बुद्धजयन्तीव्याख्यानावसरे संस्कृतवार्तायाः लोकार्पणदृश्यम्



भोपालपरिसरे वार्षिकोत्सवावसरे भाषमाणः कुलपतिः राधावल्लभत्रिपाठी

**मुख्यपरामर्शदाता**

आचार्यः राधावल्लभः त्रिपाठी

कुलपतिः

राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

**परामर्शदातृमण्डलम्**

आचार्यः के.बी. सुब्बरायुडुः, नवदेहली

कुलसचिवः (कार्यवाहः)

प्रा. जि. गङ्गन्ना, पुरी

प्रा. वेम्पटि कुटुम्बशास्त्री, शृङ्गेरी

प्रा. विश्वमूर्तिशास्त्री, जम्मू

प्रा. सुरेन्द्रझाः, लखनऊ

प्रा. आजादमिश्रः, भोपालम्

प्रा. अर्कनाथचौधरी, जयपुरम्

प्रा. एम्.ए. बाबुः, मुम्बई

प्रा. पी.जी. श्रीनिवासन्, गुरुवायूरु

प्रा. सर्वनारायणझाः, इलाहाबादम्

प्रा. हरेकृष्णमहापात्रः, गरली

**सम्पादकमण्डलम्**

डा. शुक्ला मुखर्जी

डा. रत्नमोहनझाः

कू. वेङ्कटेशमूर्तिः

प्रफुल्लगडपालः


'संस्कृतवार्ता'-सम्बद्धं स्वीयाभिप्रायम्, अत्र प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित-ई.मेल् सङ्केतेन प्रेषयन्तु- **samskritavarta@gmail.com**


# संस्कृतवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

**ISSN : 975-2676**

प्रकाशकः

**राष्ट्रियसंस्कृतसंस्थानम्**

(मानितविश्वविद्यालयः)

56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी, नवदेहली-110058

011-28524993, 28521994, 28520977

e-mail : rsks@nda.vsnl.net.in

website : www.sanskrit.nic.in


## प्रतिवार्ता




आभारतं सुरभारतीं भाजयन्ती संस्कृतवार्तेति राष्ट्रियसंस्कृतसंस्थानस्य गुणवत्तानवाचारयुतस्य विश्वविद्यालयस्य प्रसाराय अनिवार्योपक्रमोऽयं, सामाजिकदायित्वञ्चापि यत् सर्वसामाजिकाः अस्माकं संस्थानस्य विकासयात्रां जानीयुः अभिनन्देयुश्च। नवसर्जनं नवप्रकाशनं नवप्रतिभा चात्र द्योतन्ते, इत्येतदर्थं पुण्यप्रयासोऽयमनुभूयते। अखिलपरिसराणां समसामयिकवार्ताः सांस्थानिकेषु सर्वपारिवारिकेषु कुटुम्बत्वं गौरवानुभूतिञ्च सम्प्रेषयन्ति। निस्सन्देहं संस्थानपरिजनेभ्यः शिक्षकेभ्यः शिक्षार्थिभ्यः इतरेभ्यश्च अभिप्रेरणायाः रचनात्मकस्पर्धायाः चास्पदमिदम्। मन्ये प्राधान्यमिदमेव वार्तापत्रस्यास्य **संस्कृतवार्ता**ख्यस्य। साधुः शिल्पं पत्रस्य, साधुवादाः शिल्पकारेभ्यः।


**डा. नितिनजैनः**, संविदाशिक्षकः (शिक्षाशास्त्रम्),
राष्ट्रियसंस्कृतसंस्थानम्, भोपालपरिसरः

## समायोजितः शङ्करजयन्तीव्याख्यानकार्यक्रमः

०९ मई, २०११ दिनाङ्के राष्ट्रियसंस्कृतसंस्थान-भारतीयदार्शनिकानुसन्धानपरिषदोः संयुक्त-तत्त्वावधाने नवदेहलीस्थ-इण्डिया-इन्टरनेशनल्-सेन्टर् इत्यत्र अनेक्सीप्रेक्षागृहे द्वितीयः शङ्करजयन्तीव्याख्यानकार्यक्रमः सुसम्पन्नः। अस्मिन् कार्यक्रमे सर्वादौ आचार्यगोदावरीशमिश्रः गतवर्षे समायोजितस्य प्रथमशङ्कर-जयन्तीकार्यक्रमस्य परिचयपुरस्सरं अद्वैतवेदान्ते परमानन्दस्वामिनां योगदानविषयेऽभाषत्। कार्यक्रमे अस्मिन् मुख्यवक्तृत्वेन स्वामिचरणाः श्रीपरमानन्दभारतीवर्याः समुपस्थाय स्वव्याख्याने शङ्कराचार्यस्य जीवनदर्शनयोः विषये व्यबोधयन्। तदनु राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठी अध्यक्षीयवक्तव्ये स्वामिनां प्रति तदीयविद्वत्तापूर्णव्याख्यानार्थं धन्यवादं समर्पयत्। कार्यक्रमान्ते संस्थानस्य कुलसचिवः आचार्यः के.बी. सुब्बरायुडुः सर्वेभ्यः धन्यवादं प्रादात्। कार्यक्रमसञ्चालनं डा. सुशिमदुबे अकरोत्।




मञ्चे वामतः गोदावरीशमिश्रः परमानन्दस्वामी, राधावल्लभत्रिपाठी भाषमाणः सुशिमदूबे च




व्याख्यानकार्यक्रमस्य समापनावसरस्य किञ्चन दृश्यम्



कार्यक्रमे समुपस्थितः श्रोतृगणः

## भव्यतया सम्पन्नः राष्ट्रपतिसम्मानपत्रप्रदानोत्सवः

भारतशासनस्य मानवसंसाधनविकासमन्त्रालयेन प्रतिवर्षं प्राच्यभारतीयभाषाणां विद्वद्भ्यः सम्मानाः उद्घोष्यन्ते। राष्ट्रियसंस्कृतसंस्थानम् अस्य उपक्रमस्य दायित्वं निर्वहति। संस्कृत-पालि/प्राकृत-अरबी-फारसी-भाषाणां संरक्षण-उन्नयन-विकास-प्रचारादिदृष्ट्या स्वयं कष्टं सोढ्वापि प्रयत्नरताः महान्तः पण्डिताः तपस्विनश्च एतत्परियोजनानन्तर्गततया सम्मानिताः भवन्ति।

अस्मिन् वर्षे ०६.०५.२०११ तमे दिनाङ्के राष्ट्रपतिभवनस्य अशोकाख्ये सभाप्रकोष्ठे महता वैभवेन सम्मान-समारोहः समायोजितोऽभवत्। कार्यक्रमेऽस्मिन् भारतवर्षस्य राष्ट्रपतयो महामहिमशालिन्यः श्रीमत्यः प्रतिभादेवीसिंहपाटिल-महोदयाः २००८-२००९ वर्षयोः चितेभ्यः विद्वद्भ्यः सम्मानपत्रं, राङ्कवं पञ्च-लक्षात्मकं धनराशिं च प्रदत्तवत्यः। अवसरेऽस्मिन् एतत्परियोजनानन्तर्गततया प्रदीयमानं महर्षिबादरायणव्याससम्मानपत्रं प्राप्तकर्तॄणां कृतेऽपि राष्ट्रपतयः सम्मानपत्रं, राङ्कवम् एकलक्षरूप्यकाणि च अयच्छन्। अवसरेऽस्मिन् सम्मानिताः संस्कृतभाषायाः विद्वांसः इमे सन्ति-

मुख्यालयवार्ता

**२००८ तमस्य वर्षस्य राष्ट्रपतिसम्मानपत्रप्राप्तकर्तारः ( संस्कृतभाषायाम् ) -**

१. आचार्यः के. हयवदनपुराणिकः, २. डा. विष्णुभट्लसुब्रह्मण्यशास्त्री, ३. डा. उमारमणझाः, ४. आचार्या (श्रीमती) अरुणा गोयल, ५. आचार्यः डा. नरदेवशास्त्री, ६. डा. एम्. इ. रङ्गाचार्, ७. डा. केशवरावसदाशिवशास्त्रिमुसलगांवकरः, ८. आचार्या (श्रीमती) सरोजा विद्याधर भाटे, ९. पं. वैकुण्ठविहारीनन्दः, १०. पं. सत्यनारायणशास्त्री, ११. श्री अनन्तकृष्णन्-शिवरामकृष्णशास्त्री, १२. पं. जनार्दनपाण्डेयः, १३. पं. पुरुषोत्तमत्रिपाठी, १४. आचार्यः भवानीप्रसादभट्टाचार्यः, १५. आचार्यः सीतानाथाचार्यः च।



२००८ तमे वर्षे राष्ट्रपतिसम्मानप्राप्तकर्तॄणां विदुषां किञ्चन समूहचित्रम्

**पालि/प्राकृत-भाषायाम् -** १. आचार्यः गोकुलचन्द्रजैनः

**२००८ तमस्य वर्षस्य महर्षिबादरायणव्याससम्मानप्राप्तकर्ता ( संस्कृतभाषायाम् ) -** १. डा. कृ. रामसुब्रह्मण्यः।

**२००९ तमस्य वर्षस्य राष्ट्रपतिसम्मानपत्रप्राप्तकर्तारः ( संस्कृतभाषायाम् ) -**



२००९ तमे वर्षे राष्ट्रपतिसम्मानप्राप्तकर्तॄणां विदुषां किञ्चन समूहचित्रम्

१. आचार्यः कोम्पेल्लरामसूर्यनारायणः, २. आचार्यः वाचस्पतिशर्मत्रिपाठी, ३. डा. रमाकान्तशुक्लः, ४. आचार्यः विश्वमूर्तिशास्त्री, ५. डा. एन्.एस्. अनन्तरङ्गाचार्यः, ६. डा. एन्. गोपालपणिक्कर्, ७. डा. सुद्युम्न-आचार्यः, ८. आचार्यः केशवरामरावजोशी, ९. डा. भगवानपण्डा, १०. डा. (श्रीमती) कमल आनन्द, ११. पं. बदरिप्रसादशास्त्री, १२. पं. अन्नादूरराजगोपालाचार्यः, १३. आचार्यः रामचन्द्रपाण्डेयः, १४. आचार्यः अशोककुमारकालिया, १५. आचार्यः समीरणचन्द्रचक्रवर्ती, १६. आचार्यः शेल्डॉन पोलॉकः च।

**पालि/प्राकृत-भाषायाम् -** १. आचार्यः धर्मचन्द्रजैनः

**२००९तमस्य वर्षस्य महर्षिबादरायणव्याससम्मानप्राप्तकर्तारः ( संस्कृतभाषायाम् ) -** १. डा. मल्हार-अरविन्दकुलकर्णी, २. डा. सच्चिदानन्दमिश्रः, ३. डा. नारायणदाशः, ४. डा. शशिभूषणमिश्रः च।

अभिनन्दनम्

मुख्यालयवार्ता

## राष्ट्रियज्ञानानायेन आभन्त्सयति राष्ट्रियसंस्कृतसंस्थानम्

अचिरादेव राष्ट्रियसंस्कृतसंस्थानं तत्परिसरैस्सह राष्ट्रिय-ज्ञान-आनायेन राष्ट्रियज्ञानजालकेन वा (National Knowledge Network इत्यनेन) सूत्रितं भविष्यति। अनेन राष्ट्रियज्ञानानायेन विविधविषयेषु संलग्नाः प्रायेण १५०० संस्थाः संघटनानि च आभन्त्सयन्ति। साम्प्रतम् अनेन आनायेन प्रायशः २५२ संस्थाः सम्बद्धाः सन्ति। राष्ट्रियज्ञानानायस्योद्देश्यं तावत्सर्वविधानाम् उच्चशिक्षण-विज्ञान-प्रोद्योगिकी-अनुसन्धान-विकासप्रभृतिक्षेत्रेषु संलग्नानां संस्थानां मिथः संयोजनकरणं वर्तते। राष्ट्रियज्ञानानायस्य अनुप्रयोगविस्तारः शिक्षा-कृषि-स्वास्थ्यप्रभृतिविषयेष्वपि वर्तते। अनेन संयोजनेन तत्तत्संस्थानं विशेषज्ञानां समुचितं लाभं प्राप्तुमर्हति। अयं आनायः अत्युच्चगतियुतो भविष्यति। यस्य क्षमता 1500 Nodes (शिराः), यत्खलु Ultra High Speed (10 Gbps) सहितं कार्यं सम्पादयिष्यति। राष्ट्रियज्ञानानायेनानेन सूत्रिताः संस्थाः साक्षात् 100 Mbps/ 1 Gbps इत्यनया गत्या कार्यं सम्पादयितुं शक्ष्यन्ति। राष्ट्रियज्ञानानायस्यास्य आभासिकग्रन्थालयमाध्यमेन (Virtual Library द्वारा) ग्रन्थानां, शोधपत्रिकाणां, शोधालेखानां वार्तापत्राणां च सम्मिलितः उपयोगः अथ च परस्परं ज्ञान-सूचनयोः आदानं प्रदानं च भवितुं शक्ष्यति। अनेन आनायेन दूरस्थशिक्षायाः प्रोत्साहनमपि भविष्यति।

## बुद्धजयन्तीव्याख्यानकार्यक्रमे आचार्य-सामदोङ्गरिंपोचेवर्याणां व्याख्यानम्




वेदिकासीनाः वामतः गोविन्दचन्द्रपाण्डेयः, सामदोङ्गरिंगपोचे, गोदावरीशमिश्रः, राधावल्लभत्रिपाठी च

नवदेहलीस्थयोः राष्ट्रियसंस्कृतसंस्थान-भारतीयदार्शनिकानुसन्धानपरिषदोः मिथः सहकारेण १२ मई, २०११ दिनाङ्के नवदेहलीस्थ-इण्डिया-इण्टरनेशनल्-सेन्टर् इत्यत्र अनेक्सी-प्रेक्षागृहे द्वितीयो बुद्धजयन्तीव्याख्यानकार्यक्रमः सुसम्पन्नतां यातः।

कार्यक्रमोऽयं वाराणसीस्थ-केन्द्रीयतिब्बत्युच्चाध्ययनसंस्थानस्य निदेशकचराणां आचार्यसामदोङ्गरिंपोचेमहोदयानां मुख्यवक्तृत्वे विश्वविश्रुतविदुषां शिमलास्थ-भारतीयोच्चाध्ययनसंस्थानस्य अध्यक्षचराणाम् आचार्यगोविन्दचन्द्रपाण्डेयमहोदयानाम् आध्यक्ष्ये च प्रवृत्तः। सर्वादौ संस्थाद्वयस्य सदस्यैः पुष्पगुच्छसमर्पणपुरस्सरम् अतिथीनां स्वागतं व्याहृतम्। तदनु आचार्यगोदावरीशमिश्रः कार्यक्रमं पुरस्कृत्य अवाचयत्। आचार्याणां सामदोङ्गरिंपोचेवर्याणां परिचयं कारयन् सः अकथयत् यत् आचार्याः सामदोङ्गरिंपोचेवर्याः अद्यतनकालस्य विशिष्टाः विद्वांसः, शिक्षकाः, दार्शनिका अहिंसात्मकान्दोलनस्य गान्धिवादिनः चिन्तकाश्च वर्तन्ते इति। सः आचार्यगोविन्दचन्द्रपाण्डेयान् अपि परिचाययन् स्वागतवचांसि समर्पयत्।




सामदोङ्गरिंपोचेवर्येभ्यः स्मृतिचिह्नं समर्पयन् गोदावरीशमिश्रः

आचार्या सामदोङ्गरिंपोचेवर्याः चतुर्थमोद्यानमिति विषये व्याख्यानम् अकथयन्। प्राच्यबौद्धदार्शनिकानाम् अवदानं, बुद्धशिक्षानां विवेचनम्, आधुनिकपरिप्रेक्ष्ये बुद्धशासनस्य दर्शनस्य च महत्त्वम् इत्यादिविषयेष्वपि ते स्वाभिप्रायं प्राकटयन्। अनन्तरम् आचार्याः गोविन्दचन्द्रपाण्डेयमहोदयाः अध्यक्षीय-भाषणे अष्टसाहस्रिका प्रज्ञापारमिता-सूत्रम्, अष्टवग्ग, सुत्तनिपात इत्यादि-प्राच्यग्रन्थानां उद्धरणपुरस्सरम् आर्य-सत्यानां महत्त्वं प्रकटयन्तो मुख्यवक्त्रे अभिनन्दनवचांसि समर्पयत्। अवसरेऽस्मिन् राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठी बुद्धजयन्तीव्याख्यानकार्यक्रमस्य गौरवं प्रत्यपादयत्। ततः राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रं 'संस्कृतवार्ता' लोकार्पितमभवत्। तदनन्तरं राङ्कव-स्मृतिचिह्न-फल-ग्रन्थैः आचार्यसामदोङ्गरिंपोचे-गोविन्दचन्द्रपाण्डेयौ सभाजितौ अभवताम्। डा. मर्सीहेलनवर्यया कृतधन्यवादज्ञापनेन कार्यक्रमः सम्पूर्तिं यातः। कार्यक्रमस्यास्य सञ्चालनं डा. सुशिमदुबे अकरोत्।



कार्यक्रमे समुपस्थितः श्रोतृसमुच्चयः

**गुणदोषसमाहारे गुणान् गृह्णन्ति साधवः।**
**क्षीरवारिसमाहारे हंसः क्षीरमिवाखिलम्॥ -पद्मपुराणम्, १.३५**

## प्रचलिता प्राकृतभाषा-साहित्ययोः पाठ्यशाला




समापनकार्यक्रमे भाषमाणः आचार्यराधावल्लभत्रिपाठी, मञ्चे आसीनाः विद्वांसश्च

प्राकृतभाषा-साहित्ययोः २१ दिनात्मिका काचित् पाठ्यशाला ०८-२९ मई, २०११ मिते काले नवदेहलीस्थयोः राष्ट्रियसंस्कृतसंस्थान-भोगीलाललहेरचन्दप्राच्यविद्यासंस्थानयोः मिथः सहयोगेन भोगीलाललहेरचन्दप्राच्यविद्यासंस्थाने समायोजिताभवत्। विगतेभ्यः द्वाविंशवर्षेभ्यः इयं पाठ्यशाला प्रतिवर्षं सातत्येन प्रचलन्ती वर्तते। अस्यां पाठ्यशालायाम् अस्मिन् संवत्सरे १७ छात्राः पाठ्यक्रमं समाप्य प्रमाणपत्राणि प्राप्नुवन्। अस्याः पाठ्यशालायाः उद्घाटनकार्यक्रमः ०८ मई, २०११ दिनाङ्के दिल्लीविश्वविद्यालयस्य सङ्कायाध्यक्षचरस्य डा. एस्. एस्. राणामहोदयस्य आध्यक्ष्ये सम्पन्नः। कार्यक्रमेऽस्मिन् प्राकृतभाषायाः विशिष्टो विद्वान् आचार्यः सत्यरञ्जनबैनर्जी उद्घाटनभाषणमकरोत्।

पाठ्यशालायामस्यां विशिष्टप्राकृतव्याकरणशैलीमाध्यमेन छात्राः बोध्यन्ते, येन हि अल्पकाले एव अध्यापिते विषये ते विज्ञाः ज्ञातव्याकरणाः च जायन्ते। वर्षेऽस्मिन् आचार्यसत्यरञ्जनबैनर्जि-डा. अनीताबन्धोपाध्याय - आचार्यजगतरामभट्टाचार्य - डा. दीनानाथशर्म - डा. कमलेशकुमारजैन-डा. दामोदरशास्त्रि - डा. कमलकिशोरजैनाः प्रशिक्षकत्वेन छात्रान् प्रबोधयन्।



प्रमाणपत्रप्रदानावसरस्य किञ्चन दृश्यम्

२१ मई, २०११ दिनाङ्के संवृत्ते समापनकार्यक्रमे दिल्लीविश्वविद्यालयस्य संस्कृतविभागाध्यक्षः आचार्यमिथिलेशचतुर्वेदी अध्यक्षत्वेन, राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठी मुख्यवक्तृत्वेन संस्थानकुलसचिवः आचार्यः के. बी. सुब्बरायुडुः विशिष्टातिथित्वेन च सभाम् अलङ्कृतवन्तः। अवसरेऽस्मिन् आचार्यः के. बी. सुब्बरायुडुः तत्रत्यां पाठ्यशैलीं प्रशंसन् राष्ट्रियसंस्कृतसंस्थानेन अपेक्षितसहयोगः करिष्यते इति स्वमन्तव्यं प्राकटयत्। सः प्राकृताध्ययनस्यावश्यकतां भृशं प्रत्यपादयत्। आचार्यः राधावल्लभत्रिपाठी अवसरेऽस्मिन् प्राकृतभाषायाः महत्त्वं प्राकटयत्। आचार्यः मिथिलेशचतुर्वेदी संस्कृतनाटकेषु प्रयुक्तं प्राकृतं यथातथम् अध्यापयितुं प्रावोचत्। अवसरेऽस्मिन् प्राकृतभाषा-साहित्ययोः विशिष्टाः विद्वांसः उपस्थिताः आसन्।




प्रशिक्षणविषये भाषमाणः डा. रत्नमोहनझाः मञ्चासीनाः विद्वांसश्च

## प्रवृत्तः प्रगतप्रशिक्षणवर्गः

नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानेन मानितविश्वविद्यालयेन अनौपचारिकसंस्कृत-शिक्षकाणां शैक्षिकस्तरं प्रवर्धयितुम् अष्टादशदिवसीयः प्रगतप्रशिक्षणवर्गः समायोजितः। असमराज्ये होजाई इति स्थाने गीताश्रमे २७.०३.२०११ तः १३.०४.२०११ पर्यन्तं वर्गोऽयं प्रवृत्तः। पूर्वोत्तरराज्यशिक्षकाणां कृते संस्थानेन प्रथमतया आयोजितेऽस्मिन् वर्गे महामहोपाध्याया आचार्या दीक्षितपुष्पा अतीव सरलपद्धत्या पाणिनिव्याकरणस्य केषाञ्चन प्रकरणानाम् अध्यापनमकरोत्। संस्थानकुलपतेः आचार्यराधावल्लभत्रिपाठिनः उद्बोधनेन सर्वेऽपि छात्राः आनन्दिताः। कुलपतिमहोदयेन संस्कृतवाग्व्यवहारस्य प्रकर्षाय प्रोक्तीनाम् आभाणकानां च सोदाहरणं निर्वचनं विहितम्। संस्थानस्य कुलसचिवः आचार्यरामानुजदेवनाथः, आचार्यशिवप्रसाददीक्षितः, सम्भाषणसन्देश-पत्रिकासम्पादकः वैयाकरणश्च आचार्यजनार्दनहेगडे, सुप्रसिद्धप्रशिक्षणविधाविशेषज्ञः डा. विश्वासः, वैयाकरणः डा. श्रीप्रकाशपाण्डेयः, डा. नागरत्ना हेगडे, डा. शान्तला विश्वास, पूर्वोत्तरराज्यसंयोजकः आचार्यः दीपककुमारशर्मा, अनौपचारिकसंस्कृतशिक्षणस्य राष्ट्रियसंयोजकः डा. रत्नमोहनझा च छात्रेभ्यः प्रशिक्षणम् अयच्छन्। प्रशिक्षणप्रमुखस्य आचार्यस्य वाई. एस. रमेशस्य निर्देशने प्रवृत्तेऽस्मिन् आवासीये प्रशिक्षणवर्गे ९० प्रतिभागिनः लाभम् अवाप्नुवन्। प्रातः सप्तवादनतः रात्रौ दशवादनं यावदतीवानन्देन प्रतिभागिनः अध्याप्यमानं विषयं पठन्ति स्म। ते पौनःपुन्येन एतादृशं वर्गं पूर्वोत्तरराज्येषु इष्टवन्तः। वर्गस्यास्य स्थानीयं संयोजनं डा. नृपेन्द्रनाथशर्मा अकरोत्। शिक्षार्थिनां भोजनावासादिव्यवस्थाः काकली-शारदा-भवेन-मनोरञ्जन-जयन्त-मृणालप्रभृतिभिः सुनिर्व्यूढाः।



प्रशिक्षणं प्राप्नुवन्तः प्रतिभागिनः

## सौप्रस्थानिक-कार्यक्रमः

१८ मई, २०११ दिनाङ्के भारतशासनस्य मानवसंसाधनविकासमन्त्रालयान्तर्गत-भाषाविभागस्य संयुक्तसचिवायाः डा. अनिताभटनागरजैनवर्यायाः सौप्रस्थानिककार्यक्रमः राष्ट्रियसंस्कृतसंस्थानस्य सभागारे समायोजितः आसीत्। कार्यक्रमेऽस्मिन् डा. अनिताभटनागर-जैनवर्यायाः परिचयपुरस्सरं विद्वत्ताविषये कार्यशैलीविषये च क्रमशः आचार्यराधावल्लभ-त्रिपाठी, आचार्यरमाकान्तशुक्लः आचार्यः के.बी. सुब्बरायुडुश्च अभाषन्त। डा. जैनवर्या अपि संस्थानं संस्थानविदुषां च प्रति आत्मीय-स्नेहं प्रकटितवती। सञ्चार-सूचना-प्रौद्योगिकी-मन्त्रालयं प्रति स्थानान्तरितेयं महोदया ततः अपि राष्ट्रियसंस्कृतसंस्थानस्य यथायोग्यं सहाय्यम् आचरितुम् आश्वासनं दत्तवती। कार्यक्रमस्य सञ्चालनं डा. रत्नमोहनझा अकरोत्।



कार्यक्रमे भाषमाणा अनिताभटनागरजैन, ताम् उभयतः के.बी. सुब्बरायुडु राधावल्लभत्रिपाठी च



सौप्रस्थानिककार्यक्रमावसरस्य समूहचित्रम्

## प्रोन्नताः संस्थानसदस्याः

संस्थानसदस्या इमे विविधशैक्षणिकपदेभ्यः प्रोन्नतिं प्राप्य सहायकाचार्यत्वेन परिणताः अभूवन्-

१. डा. के. महापात्र,
२. श्री पी. सी. महापात्रः,
३. डा. एन्. सी. साहू,
४. श्रीमती के. ए. जेस्सी,
५. डा. सी. सन्तः,
६. डा. पी. उनीथनः,
७. डा. जगन्नाथझा,
८. डा. एस्. पी. सिंहः,
९. डा. रामजीपाण्डेयः,
१०. डा. एस्. शतपथी,
११. डा. शैलजा पाण्डेय,
१२. श्री पी. एन्. वत्सः,
१३. डा. ललीता चन्द्रन,
१४. डा. विजयलक्ष्मी,
१५. डा. रामबहादुरदूबे,
१६. डा. छोटीबाई मीणा,
१७. डा. मोहम्मदहनीफः,
१८. डा. सुनीता गुप्ता,
१९. डा. माला चन्द्रा,
२०. डा. सुरेशपाण्डेयः,
२१. श्रीप्रफुल्लगडपालः,
२२. डा. टी. महेन्द्रः,
२३. डा. डी. पी. दासमहापात्रः,
२४. डा. आर्. एम्. प्रतिहारी,
२५. डा. एन्. के पाण्डेयः,
२६. डा. एस्. एन्. शर्मा,
२७. श्रीरामदासशर्मा,
२८. श्रीमती निर्मल गुप्ता च।

संस्थानपरिवारः एतेभ्यः प्रोन्नतेभ्यः शुभाशयान् प्रकटयति।

## लब्धराष्ट्रपतिसम्मानाः संस्थानविद्वांसः

राष्ट्रियसंस्कृतसंस्थानस्य तपोमूर्तिभिः विद्वद्भिः संस्कृतक्षेत्रे विशिष्टयोगदानार्थं विविधसंवत्सरेषु राष्ट्रपतिसम्मानपत्राणि युवविद्वद्भिश्च महर्षिबादरायणव्याससम्मानपत्राणि लब्धानि-

### राष्ट्रपतिसम्मानिताः विद्वांसः

| | |
|---|---|
| १. आचार्यः हरिहरझाः | १९९५ |
| २. डा. दयानन्दभार्गवः | २००३ |
| ३. डा. किशोरनाथझाः | २००३ |
| ४. डा. गयाचरणत्रिपाठी | २००५ |
| ५. डा. जगन्नाथपाठकः | २००५ |
| ६. डा. उमारमणझाः | २००८ |
| ७. आचार्यः विश्वमूर्तिशास्त्री | २००९ |
| ८. डा. वाचस्पतिशर्मत्रिपाठी | २००९ |
| ९. पं. मदनमोहनशर्मा | २०११ |

### महर्षिबादरायणव्याससम्मानेन अलङ्कृताः विद्वांसः

| | |
|---|---|
| १. डा. जनार्दनपाण्डेयः | २००२ |
| २. डा. हरेरामत्रिपाठी | २००३ |
| ३. डा. अजयकुमारमिश्रः | २००५ |

शुभेच्छाः

अभिनन्दनम्

शुभकामनाः




उद्घाटनावसरे दीपं प्रज्वालयन्तः सुजातापुरकायस्थ, अशोकगोस्वामी, एस्.पी. शर्मा, राधावल्लभत्रिपाठी, शुक्ला मुखर्जी च

## गौहाटी-विश्वविद्यालये राष्ट्रियसंस्कृतसम्मेलनम्

नवदेहलीस्थ-राष्ट्रियसंस्कृसंस्थानेन गुवाहाटीस्थ-गौहाटीविश्वविद्यालयस्य सहकारेण १९-२१, मई, २०११ इत्यवधौ 'पौराणिकम् ऐतिह्यम् – पूर्वोत्तरराज्यानां विशेषसन्दर्भे' इत्यस्मिन् विषये बृहद् राष्ट्रियसंस्कृतसम्मेलनं गौहाटीविश्वविद्यालयस्य फणीधरदत्तसभागारे समायोजितम्। अस्य राष्ट्रियसंस्कृतसम्मेलनस्य उद्घाटनकार्यक्रमः १९.०५.२०११ दिनाङ्के सञ्जातः। सम्मेलनस्यास्य उद्घाटनकार्यक्रमे संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठी अध्यक्षत्वेन, गौहाटीविश्वविद्यालयस्य उपाचार्यः डा. अखिलकुमारमेधिः मुख्यातिथित्वेन, अलीगढमुस्लिमविश्वविद्यालयस्य संस्कृतविभागाध्यक्षः डा. एस. पी. शर्मा विशिष्टातिथित्वेन राष्ट्रपतिसम्मानितो विद्वान् अशोककुमारगोस्वामी मुख्यवक्तृत्वेन सभाम् अलङ्कृतवन्तः।

सम्मेलनेऽस्मिन् त्रिष्वपि दिनेषु शैक्षिकसत्राणि प्रवृत्तानि। एषु सत्रेषु विद्वांसः निर्दिष्टविषयाधारेण शोधपत्राणि अपठन् गभीरं विमर्शञ्चाकुर्वन्। २१.०५.२०११ दिनाङ्के अपराह्णे राष्ट्रियसंस्कृतसम्मेलनस्यास्य समापनसमारोहः प्रवृत्तः। समापनसमारोहेऽस्मिन् अध्यक्षत्वेन गौहाटी-विश्वविद्यालयस्य उपाचार्यः अखिलकुमारमेधिः, मुख्यातिथित्वेन नवदेहलीस्थराष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठी, मुख्यवक्तृत्वेन प्राच्यतत्त्वविद् राष्ट्रपतिसम्मानितविद्वान् च आचार्यः अपूर्वचन्द्रबरठाकुरीया, विशिष्टातिथित्वेन उज्जयिनीस्थमहर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानस्य सदस्यसचिवचरः आचार्यः श्रीकिशोरमिश्रः सम्मानितातिथित्वेन डा. सुखमयभट्टाचार्यश्च सभां मण्डितवन्तः।




सम्मेलनावसरे प्रस्तुतस्य कस्यचित् सांस्कृतिककार्यक्रमस्य दृश्यम्



उद्घाटनकार्यक्रमे मञ्चासीनाः वामतः एन्. खेवितो सेमा, राधावल्लभत्रिपाठी शम्भूनाथश्च

## आयोजितम् अखिलभारतीयसंस्कृतहिन्दीसम्मेलनम्

'पूर्वोत्तरराज्यानां जनजातीयभाषाणां विकासे संस्कृतस्य हिन्द्याश्च योगदानम्' इति विषमाधृत्य नागालैण्डराज्यस्य दीमापुरनगरे सुपरमार्केट्स्थ-सारामती-विश्रामालये २६-२८ मई, २०११ इत्यवधौ त्रिदिवसीयम् अखिलभारतीयं सम्मेलनमायोजितमासीत्। कार्यक्रमोऽयं नवदेहलीस्थ- राष्ट्रियसंस्कृतसंस्थानस्य आगरास्थ-केन्द्रीयहिन्दीसंस्थानस्य च संयुक्तोपक्रमे संयोजितमभवत्। २६ मई, २०११ दिनाङ्के अस्य कार्यक्रमस्योद्घाटनावसरे मुख्यातिथित्वेन नागालैण्डराज्यस्य शिक्षानिदेशकः श्री एन्. खेवितो सेमा, विशिष्टातिथित्वेन केन्द्रीयहिन्दीसंस्थानस्य पूर्वनिदेशकः आचार्यः शम्भूनाथः अध्यक्षत्वेन राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठी च समुपस्थिता आसन्।



उद्घाटनावसरे प्रस्तुतस्य संस्कृतगीतगायनस्य दृश्यमेकम्

कार्यक्रमेऽस्मिन् पूर्वोत्तरराज्यीय-क्षेत्रीयभाषाणां विकासे उन्नयने च संस्कृतहिन्द्योः योगदानविषकानि नैकानि शोधपत्राणि विद्वद्भिः प्रस्तुतानि। आचार्यः के. एल्. वर्मा, आचार्यः शम्भुनाथः, आचार्यः अवधेशकुमारमिश्रः, डा. रमाकान्तपाण्डेयः, डा. रामलखनपाण्डेयः, डा. जनार्दनप्रसादपाण्डेयः, डा. सुशान्तराजः, डा. ए. सी. गौरः, डा. सोमनाथसाहुः, डा. मिनतीरथः, डा. आर्. के. बर्मन्, डा. नीलाभतिवारी, डा. शिशिरकुमारपाण्डेयः, डा. के. महापात्रः, डा. अर्चनादुबे, डा. रेखा कुमारी पाण्डे, श्रीराजवीरसिंहः, सुश्री उमा, श्रीमती वातिलीया आवो, श्रीमती सेनीटिरिला जमीर, श्रीटेमजानजमीरः, डा. अच्युतशर्मा, श्रीमती विनीता, डा. मदनगुप्तः, श्री के. फियोखामो लोठा, श्री पियोंग टेमजान, सुश्री इवेलेरि के दुनाई, सुश्री राजश्रीदेवी, श्रीचिन्मयदेका, श्री अखिलकालिया, श्रीवनलालफैला, डा. किमी, श्रीमती वेनीपासाह, कुमारी इबाला, श्रीमती सोनम वाडमू, श्री बी. पी. फिलिप, डा. चन्द्रप्रभा चैनारी, डा. अमूलवर्मन्, डा. प्रमिलादेवी, डा. अचौबीसिंहः, डा. सुवदनीदेवी, सुश्री उमावतीदेवी, श्रीचान्दम इडो सिंहः, सुश्री विद्यारानी, डा. अलीमखानः, श्रीसन्तोषकुमारः श्री उमेशकुमारः च अत्र विचारान् प्राकटयन् शोधालेखान् च अपठन्।




समापनावसरे भाषमाणः पी.एन्.वत्सः, मञ्चासीनाः रमाकान्तपाण्डेयः, शुक्लामुखर्जी परमलाल-अहिरवालः च

## अचिरादेव प्रारप्स्यन्ते प्रमाणपत्रीयपाठ्यक्रमाः

राष्ट्रियसंस्कृतसंस्थानस्य मुक्तस्वाध्यायपीठेन दूरस्थ-शिक्षाप्रणाल्या संस्कृतसम्बद्धाः नैके प्रमाणपत्रीय- पाठ्यक्रमाः अचिरादेव प्रारप्स्यन्ते। इन्दिरागान्धीराष्ट्रियमुक्तविश्व-विद्यालयस्य दूरस्थशिक्षापरिषदा (DEC द्वारा) मान्याः इमे पाठ्यक्रमाः राष्ट्रियसंस्कृतसंस्थानस्य मुक्तस्वाध्यायकेन्द्रेभ्यः सञ्चायिलष्यन्ते। एषु इमे पाठ्यक्रमाः वर्तन्ते-

१. संस्कृतपत्रकारिताप्रमाणपत्रपाठ्यक्रमः,
२. संस्कृतप्रमाणपत्रपाठ्यक्रमः (संस्कृतप्रवेशः),
३. प्राकृतप्रमाणपत्रपाठ्यक्रमः,
४. पालिप्रमाणपत्रपाठ्यक्रमः,
५. पालिपरिचयपाठ्यक्रमः,
६. संस्कृत-हिन्दी-भाषानुवादशिक्षणप्रमाणपत्रपाठ्यक्रमः,
७. संस्कृत-आंग्ल-भाषानुवादशिक्षणप्रमाणपत्रपाठ्यक्रमः,
८. नाट्यशास्त्रप्रमाणपत्रपाठ्यक्रमः,
९. शारीरिकशिक्षाप्रमाणपत्रपाठ्यक्रमः च।

## संस्कृतविकासाय निर्मीयन्ते योजनाः

राष्ट्रियसंस्कृतसंस्थानेन संस्कृतस्य विकासाय बहुविधाः प्रयत्नाः विधीयन्ते। १२तमपञ्चवर्षीययोजनान्तर्गततया इमे केचन विशिष्टाः पदक्षेपाः संस्कृतविकासाय राष्ट्रियसंस्कृतसंस्थानेन विधास्यन्ते। अत्र तावत् मन्त्रालये प्रस्तुताः विचाराधीनाः वा इमे अंशा विशिष्य प्रदीयन्ते -

१. हरियाणा-पश्चिमबङ्गयोः द्वयोः परिसरयोः चेन्नई-कोलकातयोः द्वयोः आदर्शसंस्कृतशोधसंस्थानयोः च संस्थापनम्,
२. राष्ट्रियसंस्कृतग्रन्थालयस्य (National Sanskrit Library इत्यस्य) संस्थापनम्,
३. नाट्यशास्त्राध्ययनकेन्द्रस्य (Centre for Studies in Natya Shastra इत्यस्य) संस्थापनम्,
४. संस्कृतसम्बद्धज्ञानप्रणाल्याः (Sanskrit Based Knowledge System इत्यस्याः) राष्ट्रियसंसाधनकेन्द्रस्य (National Resourse Center इत्यस्य) संस्थापनम्,
५. पालिप्राकृतभाषयोः आदर्शशोधसंस्थानस्य संस्थापनम्,
६. राष्ट्रियसंस्कृतसंस्थानस्य केन्द्रीयसंस्कृतविश्वविद्यालयत्वेन (Central Sanskrit University रूपेण) राष्ट्रियमहत्त्वाधायिसंस्थानत्वेन (Institute of National Importance रूपेण) वा परिवर्द्धनम्,
७. संस्कृतमहिलाध्ययनसंस्थायाः (Institute of Women's Studies in Sanskrit इत्यस्याः) संस्थापनम्,
८. व्यावसायिकसंस्कृताध्ययनसंस्थायाः (Institute of Vocational Studies in Sanskrit इत्यस्याः) संस्थापनम्,
९. सायंकालीनकक्ष्याणां समारम्भः चेति।

एतेषां मुख्यांशानतिरिच्यापि संस्थानस्य नैके नियमिता कार्यक्रमाः योजनाश्च प्रवर्तन्ते। तेषां कार्यक्रमाणां योजनानां चात्र उल्लेखः नाभवत्।

## प्रवृत्ता संगोष्ठी




ग्रन्थलोकार्पणस्य किञ्चन दृश्यम्

राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था हैदराबादस्था संस्कृताकादमी एप्रैलमासस्य १८, १९ दिनाङ्कयोः 'स्वामिदयानन्दसरस्वतीनां संस्कृतक्षेत्रे प्रति योगदानम्' इत्यस्मिन् विषये द्विदिवसीयां गोष्ठीं समायोजयत्। गुरुकुलकाङ्गडीविश्वविद्यालयस्य कुलपतिचरः आचार्यः महावीर-अग्रवालः मुख्यातिथिरूपेण, डा. वेदपालशास्त्री प्रमुखभाषणकर्तृरूपेण, गौरवातिथिरूपेण उस्मानियाविश्वविद्यालयस्य कुलसचिवः आचार्यः किशनरावः, कर्णाटकसंस्कृतविश्वविद्यालयस्य डायरेक्टरेट् आफ संस्कृत-स्टडीस् इत्यस्याः संस्थायाः निदेशकचरः डा. श्रीनिवासवरखेडी अध्यक्षरूपेण संस्कृताकादम्याः स्थापनापन्नः निदेशकः आचार्यः टि. केशवनारायणश्च सङ्गोष्ठ्याः उद्घाटनसमारोहे उपस्थिता आसन्। अवसरेऽस्मिन् बाणवाङ्मयचरितम्, हा हा हू हू, जर्नल् आफ संस्कृताकादमी, अभिज्ञानशाकुन्तलं, गणपाणिनीयं (द्वितीयभागः), प्रस्थानत्रयप्रश्नमाला इत्यादीनि संस्कृताकादम्या मुद्रितानि पुस्तकानि लोकाय अर्पितानि। संस्कृताकादम्याः उपनिदेशिका डा. के. वरलक्ष्मीः निजामकलाशालायाः आचार्यः डा. विद्यानन्दार्यश्च अस्याः सङ्गोष्ठ्याः संयोजिका संयोजकश्च आस्ताम्।

## संवृत्ता संस्कृतपत्रकारितापाठ्यक्रमसम्बद्धा कार्यशाला



कार्यशालायाः उद्घाटनावसरे भाषमाणः के.बी. सुब्बरायुडुः, उपस्थिताः विद्वांसश्च

नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य मुक्तस्वाध्यायपीठेन दूरस्थविधिना प्रारप्स्यमानस्य संस्कृतपत्रकारिताप्रमाणपत्रपाठ्यक्रमस्य निर्माणार्थं काचित् कार्यशाला ३१ जून, २०११ तः ०३ जुलाई, २०११ दिनाङ्कं यावत् संस्थानमुख्यालये समायोजिता। अस्यां कार्यशालायां संस्कृतपत्रकारिताविषये कृतभूरिश्रमाः डा. आचार्यरमाकान्तशुक्ल-डा. बनमालीबिस्वाल-डा. चन्द्रभूषणझा-डा. लालाशङ्करगयावालप्रभृतयो विद्वांसः समागत्य पाठ्यक्रमनिर्माणम् अकुर्वन्। कार्यशालायाः समारम्भावसरे संस्थानकुलसचिवः आचार्यः के.बी. सुब्बरायुडुः, श्रीलालबहादुर-शास्त्रिराष्ट्रियसंस्कृतविद्यापीठे शोधप्रकाशनविभागाध्यक्षः आचार्यरमेशकुमारपाण्डेयः, उपकुलसचिवः (शोधप्रकाशनविभागः) डा. सच्चिदानन्दतिवारी, डा. जयप्रकाशनारायणः च समुपस्थिताः आसन्।

# कुलपतेः दैनन्दिनी

| | |
|---|---|
| ०५.०४.११ | नवदेहलीस्थ–इन्दिरागान्धीराष्ट्रियकलाकेन्द्रे कलाकोशसम्बद्धे कार्यक्रमपरामर्शसमित्युपवेशने उपस्थितिः। |
| ०६.०४.११ | विश्वसंस्कृतसम्मेलनस्य प्रदर्शिनीसम्बद्धे उपवेशने आध्यक्ष्यम्। |
| ०९.०४.११ | शृङ्गेर्यां शृङ्गेरीमठस्य शङ्कराचार्यस्वामिनां षोडशतमे जन्मशताब्दसमारोहे भागग्रहणम्। |
| १२.०४.११ | असमस्थ–होजाईनगरे राष्ट्रियसंस्कृतसंस्थानेन आयोजितस्य अनौपचारिकसंस्कृतशिक्षणस्य प्रगतप्रशिक्षणवर्गसमापनकार्यक्रमे आध्यक्ष्यम्। |
| १५.०४.११ | राष्ट्रियसंस्कृतसंस्थानस्य अध्यापकानां विभागीयप्रोन्नतिसमित्युपवेशने आध्यक्ष्यम्। |
| १६.०४.११ | भोपालपरिसरस्य वार्षिकोत्सवे आध्यक्ष्यम्। |
| १८.०४.११ | नवदेहलीस्थ–श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठे भाषायाः संयुक्तसचिवया सहोपवेशनम्। |
| २०.०४.११ | नेपालदेशे नेपालसंस्कृतविश्वविद्यालयस्य चतुर्थे दीक्षान्तसमारोहे मुख्यातिथित्वं दीक्षान्तभाषणञ्च। |
| २४.०४.११ | वाराणसीस्थ–बनारसहिन्दूविश्वविद्यालये समायोजिते पण्डितमदनमोहनमालवीयस्य १५० तमे जयन्तीसमारोहे आध्यक्ष्यम्। |
| २६.०४.११ | राष्ट्रियसंस्कृतसंस्थानस्य प्रकाशनसमित्युपवेशने आध्यक्ष्यम्। |
| २७.०४.११ | राष्ट्रियसंस्कृतसंस्थानस्य प्रबन्धनसमित्युपवेशने आध्यक्ष्यम्। |
| २८.०४.११ | राष्ट्रियसंस्कृतसंस्थानस्य अनुदानसमित्युपवेशने आध्यक्ष्यम्। |
| २९.०४.११ | श्रीदेवराजशर्मणः सेवानिवृत्तिकार्यक्रमे आध्यक्ष्यम्। नवदेहलीस्थ–इण्डिया–इन्टरनेशनल्–सेण्टर् इत्यत्र विश्वसंस्कृतसम्मेलनस्य आयोजनसमितेः उपवेशने आध्यक्ष्यम्। |
| ०३.०५.११ | नवदेहल्यां टैगोरगार्डन् इत्यत्र केन्द्रीयविद्यालयस्य विद्यालयप्रबन्धसमित्युपवेशने आध्यक्ष्यम्। संस्कृतभारत्याः ग्रन्थलोकार्पणकार्यक्रमे मुख्यातिथित्वेन समुपस्थितिः। |
| ०४.०५.११ | लखनऊपरिसरे पालि–प्राकृत–संस्कृतच्छायाप्रशिक्षणकार्यक्रमस्य सम्पूर्तिसमारोहे आध्यक्ष्यं प्रमाणपत्रप्रदानञ्च। |
| ०५.०५.११ | नवदेहलीस्थ–राष्ट्रियसंग्रहालये आचार्यवाचस्पत्युपाध्यायाभिनन्दनग्रन्थलोकार्पणकार्यक्रमे मुख्यातिथित्वेन ग्रन्थलोकार्पणम्। |
| ०६.०५.११ | नवदेहलीस्थ–राष्ट्रपतिभवने राष्ट्रपतिसम्मानकार्यक्रमे उपस्थितिः। मुक्तस्वाध्यायपीठ–परीक्षानियमसम्बद्धोपवेशने आध्यक्ष्यम्। |
| ०९.०५.११ | नवदेहलीस्थ–इण्डिया–इण्टरनेशनल्–सेन्टर् इत्यत्र शङ्करजयन्तीव्याख्यानकार्यक्रमे आध्यक्ष्यम्। |
| ११.०५.११ | कस्यचित् विशिष्टसंस्कृतकार्यक्रमस्य ध्वन्याङ्कनार्थं नवदेहलीस्थ–आकाशवाणीकेन्द्रे उपस्थितिः। |
| १२.०५.११ | नवदेहलीस्थ–इण्डिया–इण्टरनेशनल्–सेण्टर् इत्यत्र बुद्धजयन्तीव्याख्यानकार्यक्रमे आध्यक्ष्यम्। |
| १३.०५.११ | दिल्लीविश्वविद्यालयस्य कुलपतिप्रकोष्ठे उज्जयिनीस्थ–महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानस्य अधिशासीपरिषदः उपवेशने उपस्थितिः। |
| १७.०५.११ | भोपालपरिसरे अनुसन्धानपरियोजनासम्बद्धोपवेशने समुपस्थितिः। |
| १८.०५.११ | भाषायाः संयुक्तसचिवचरायाः डा. अनिताभटनागरजैनवर्यायाः सौप्रस्थानिककार्यक्रमे उपस्थितिः। |
| १९–२१.०५.११ | गुवाहाटीनगरे त्रिदिवसीयराष्ट्रियसंस्कृतसम्मेलने उपस्थितिः। लखनऊपरिसरे पालि–प्राकृत–संस्कृतच्छायाप्रशिक्षणकार्यक्रमस्य सम्पूर्तिसमारोहे आध्यक्ष्यं प्रमाणपत्रवितरणञ्च। |
| २३.०५.११ | संस्थानमुख्यालये प्राचार्याणाम् उपवेशने शोधप्रवृत्तिकार्यशालायाञ्च आध्यक्ष्यम्। |
| २६–२८.०५.११ | नागालैण्डस्थ–दीमापुरे 'पूर्वोत्तरक्षेत्रीय–भाषाभ्यः हिन्दीसंस्कृतयोः अवदानम्' इति विषयाधारितराष्ट्रियसम्मेलने उपस्थितिः। |
| २९.०५.११ | नवदेहलीस्थ–भोगीलाललहेरचन्दप्राच्यविद्यासंस्थाने २३ तमायाः अखिलभारतीयग्रीष्मकालीनप्राकृतभाषासाहित्यपाठ्यशालायाः समापनकार्यक्रमे मुख्यातिथित्वेन समुपस्थितिः। |
| ०६–१०.०६.११ | ग्लासगो–विश्वविद्यालये शोधसम्बद्धकर्मणा तत्रत्यग्रन्थालये अध्ययनम्। |
| १५.०६.११ | नवदेहलीस्थ–राष्ट्रियदार्शनिकानुसन्धानपरिषदि अनुवादपरियोजनासम्बद्धोपवेशने समुपस्थितिः। |
| १७.०६.११ | भोपालस्थ–माधवरावसप्रेसमाचारपत्रसंग्रहालय–शोधसंस्थानेन आयोजिते सम्मेलने मुख्यातिथित्वेन व्याख्यानप्रदानम्। |
| २०.०६.११ | भारतशासनस्य मानवसंसाधनविकासमन्त्रालये संयुक्तसचिवेन श्रीसुनीलकुमारेण सह सम्बद्धताविषयके उपवेशने उपस्थितिः। भाषायाः संयुक्तसचिवेन श्री अनन्तकुमारसिंहेन सह संस्थानस्य कार्यक्रमाणां विषये चर्चा। |
| २१.०६.११ | संस्थानमुख्यालये अनुसन्धानसमित्युपवेशने आध्यक्ष्यम्। |
| २२.०६.११ | संस्थानमुख्यालये आधुनिकसंस्कृतसाहित्यसन्दर्भसूची–परियोजनासम्बद्धोपवेशने आध्यक्ष्यम्। |
| २३.०६.११ | नवदेहलीस्थ–शास्त्रिभवने उज्जैनस्थ–महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानस्य रजतजयन्तीसमारोहसम्बन्धोपवेशने उपस्थितिः। उज्जैनस्थ–महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानस्य वित्तसमित्युपवेशने उपस्थितिः। |
| २४.०६.११ | शिमलानगरे भारतीयोच्चाध्ययनसंस्थाने ग्रीष्मकालीनपाठ्यशालायां महाभारतविषये व्याख्यानप्रदानम्। |
| २७.०६.११ | संस्थानमुख्यालये राष्ट्रियसंस्कृतसंस्थानस्य वित्तसमित्युपवेशने आध्यक्ष्यम्। |
| ३०.०६.११ | भूटानदेशस्थ–रायलविश्वविद्यालये चतुर्थे अन्ताराष्ट्रियसम्मेलने सत्रविशेषस्य आध्यक्ष्यम्, स्वशोधपत्रस्य च प्रस्तुतिः। |

# संस्थानविदुषां क्रियाकलापाः/ उपलब्धयः

**आचार्यविश्वमूर्तिशास्त्री** – ०६.०५.२०११ दिनाङ्के जम्मूपरिसरीयप्राचार्यः आचार्यो विश्वमूर्तिशास्त्रिमहोदयो नवदेहल्यां राष्ट्रपतिभवने राष्ट्रपतिसम्मान- पत्रप्रदानेन सभाजितः।

**आचार्यः एम्. चन्द्रशेखरः** – २६-२७.०६.२०११ दिनाङ्कयोः उत्तराञ्चलसंस्कृतविश्वविद्यालये शिक्षाशास्त्रपाठ्यक्रमनिर्माणसमितौ जम्मूपरिसरस्य शिक्षाशास्त्रविभागाध्यक्षः आचार्यः एम्. चन्द्रशेखरः विषयविशेषज्ञत्वेन भागग्रहणमकरोत्।

**डा. महाबलेश्वर पि. भट्टः** – शृङ्गेरीपरिसरस्य वेदान्तविभागाध्यक्षः डा. महाबलेश्वर पि. भट्टः ०८.०५.११ तमे दिनाङ्के एस्.एन्.एस्. सेवाप्रतिष्ठानद्वारा बेङ्गलूरुनगरे शङ्करजयन्तीसमारोहे सम्मानितः। ०९.०५.११ तमे दिनाङ्के यडतोरे श्रीशङ्करभारतीस्वामिनां सान्निध्ये जप्येश्वरक्षेत्रे वेदान्तभारतीद्वारा आयोजिते प्रस्थानत्रयभाष्यपारायणसत्रे भागमगृह्णात्। १९-२३.०५.११ इत्यवधौ श्रीस्वर्णवल्लीमठे समायोजितायां वाक्यार्थसभायां भागमगृह्णात्।

**डा. बनमाली विश्वालः** – इलाहाबादस्थस्य गंगानाथझापरिसरस्य सहाचार्यः डा. बनमालीबिश्वालः अप्रैलमासे २२-२३ दिनाङ्कयोः उत्कलराज्यस्य सम्बलपुरस्थे गङ्गाधरमेहेरमहाविद्यालये आयोजितायां 'संस्कृतसाहित्यं प्रति उत्कलस्य अवदानम्' इति राष्ट्रियसंगोष्ठ्यां भागं गृहीत्वा 'आधुनिकसंस्कृतलघुकथाक्षेत्रे उत्कलस्य अवदानम्' इति विषयमधिकृत्य शोधपत्रं प्रस्तुतवान्। ०४.०५.११ दिनाङ्के प्रयागस्थे रामकृष्णमठे संस्कृतत्रैमासिक्याः आन-लाइन-ई-शोधपत्रिकायाः जाह्नव्याः षष्ठाङ्कस्य लोकार्पणावसरे मुख्यातिथिरूपेण उद्‌बोधितवान्। श्रीजगन्नाथसंस्कृत-विश्वविद्यालये आयोजितायाम् उच्चस्तरीयपाण्डुलिपिविज्ञानकार्यशालायाम् आधारपुरुषत्वेन ०४.०६.११ तः ०६.०६.११ पर्यन्तं पाण्डुलिपिविज्ञानमधिकृत्य सप्त व्याख्यानानि प्रदत्तवान्।

**डा. रमाकान्तपाण्डेयः** – जयपुरपरिसरस्य सहाचार्येणानेन दीमापुरे १९-२१ मई, २०११ इत्यवधौ समायोजितसङ्गोष्ठ्याम् 'आदीभाषायाः विकासे संस्कृतस्य योगदानम्' अपि च गोहाटीविश्वविद्यालये २६-२८ मई, २०११ इत्यवधौ समायोजितसङ्गोष्ठ्यां 'कामरूपे वैष्णवपरम्परायाः विकासः' इत्यस्मिन् विषये शोधालेखौ प्रस्तुतौ।

**डा. सुब्राय वि. भट्टः** –शृङ्गेरीपरिसरस्य मीमांसाविभागाध्यक्षः डा. सुब्राय वि. भट्टः ०४-१४.०६.२०१० इत्यवधौ बेङ्गलूरुनगरे चन्नेनहल्लिवेदविज्ञानगुरुकुले आयोजितायां मीमांसाकार्यशालायां मीमांसान्यायप्रकाशाख्यं ग्रन्थम् अपीपठत्।

**डा. नवीनहोल्लः** – शृङ्गेरीपरिसरस्य न्यायविभागाध्यक्षः डा. नवीनहोल्लः उज्जयिनीस्थकालिदाससंस्कृताकादम्याम् ०२-०५.०४.२०११ मिते काले शास्त्रव्याख्यापाठसत्रे तर्कसंग्रहदीपिकामपाठयत्।

**श्रीशरत्चन्द्रशर्मा** – १३.०६.२०११ तः १९.०६.२०११ दिनाङ्कान्तं संस्थानमुख्यालये आंग्लविषयकप्रातिस्विकपाठ्यपुस्तकनिर्माणार्थमायोजितायां कार्यशालायां जम्मूपरिसरस्य आंग्लविभागाध्यक्षः श्रीशरत्चन्द्रशर्मा पाठ्यसामग्रीनिर्माणे स्वयोगदानमकल्पयत्।

**डा. श्रीगोविन्दपाण्डेयः** – २५.०६.२०११ तः २७.०६.२०११ दिनाङ्कान्तं जम्मूपरिसरस्य शिक्षाशास्त्रविभागतो डा. श्रीगोविन्दपाण्डेयः एन्. सी. ई. आर्. टी. संस्कृतशिक्षकसन्दर्शिकानिर्माणसमितौ भागं गृहीतवान्। २६-२७.०६.२०११ दिनाङ्कयोः उत्तराञ्चलसंस्कृतविश्वविद्यालये शिक्षाशास्त्र-पाठ्यक्रमनिर्माणसमितौ जम्मूपरिसरस्य शिक्षाशास्त्रविभागतः समितिसदस्यरूपेण भागमग्रहीत्।

**डा. गणेश ईश्वरभट्टः** – शृङ्गेरीपरिसरस्य वेदान्तप्राध्यापकः डा. गणेश ईश्वरभट्टः श्रीशङ्करजयन्तीम् उपलक्ष्य ०६.०४.११ तमे दिनाङ्के शृङ्गेरीश्रीमठे श्रीशङ्कराचार्याणां सन्देशं विषयीकृत्य व्याख्यानमकरोत्। यडतोरे श्रीशङ्करभारतीस्वामिनां सान्निध्ये वेदान्तभारतीद्वारा जप्येश्वरक्षेत्रे ०९-१३.०५.२०११ इत्यवधौ समायोजिते प्रस्थानत्रयभाष्यपारायणसत्रे भागमगृह्णात्। श्रीस्वर्णवल्लीमठे १९-२३.०५.२०११ इत्यवधौ आयोजितायां वाक्यार्थसभायां वाक्यार्थविचारम् उपस्थापयत्। संस्कृतभारत्या हासनगरे २७.०४.११ तमे दिनाङ्के आयोजिते शिक्षकप्रशिक्षणवर्गे विशिष्टं व्याख्यान प्रादात्।

**डा. राघवेन्द्रभट्टः** – २०.०५.११ तमे दिनाङ्के शृङ्गेरीपरिसरस्य साहित्यप्राध्यापकः डा. राघवेन्द्रभट्टः राष्ट्रियसंस्कृतसंस्थान-असमविश्वविद्यालयाभ्यां संयोजितायां 'ईशान्यभारतस्य पौराणिकपरम्परा' इत्याख्यायां सङ्गोष्ठ्यां 'ईशान्यभारतस्य पौराणिकप्रसिद्धिः' इत्यस्मिन् विषये शोधपत्रं प्रास्तौत्।

**डा. सोमनाथसाहू** – २७.०५.११ तमे दिनाङ्के शृङ्गेरीपरिसरस्य शिक्षाशास्त्रप्राध्यापकः सोमनाथसाहू राष्ट्रियसंस्कृतसंस्थानेन नागालैण्डराज्यस्य दीमापुरनगरे आयोजितायां राष्ट्रियसङ्गोष्ठ्या 'पूर्वोत्तरभारतीयभाषाविकासे संस्कृतहिन्द्योः प्रभावः' इत्यस्मिन् विषये शोधपत्रं प्रास्तौत्।

**डा. रेखा कुमारी पाण्डे** – शृङ्गेरीपरिसरस्य हिन्दीविषयस्य सहायकाचार्या रेखा कुमारी पाण्डे २७.०५.११ तमे दिनाङ्के राष्ट्रियसंस्कृतसंस्थानेन नागालैण्डराज्यस्य दीमापुरे आयोजितायां राष्ट्रियसङ्गोष्ठ्यां 'पूर्वोत्तरभारतीयभाषाविकासे संस्कृतहिन्द्योः प्रभावः' इत्यस्मिन् विषये शोधपत्रं प्रास्तौत्।

**श्री कू. वेङ्कटेशमूर्तिः** – नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालये मुक्तस्वाध्यायपीठस्य सहायकाचार्योऽयं ०९.०५.११ तः १४.०५.११ पर्यन्तं यडतोरे श्रीशङ्करभारतीस्वामिनां सान्निध्ये मैसूरुसमीपे श्रीजप्येश्वरक्षेत्रे वेदान्तभारत्या समायोजिते राष्ट्रस्तरीये शाङ्करभाष्यपारायणसत्रे भागमगृह्णात्।

**डा. अशोकचन्द्रगौडशास्त्री** – नागालैण्डप्रदेशे दीमापुरमण्डले मईमासे २६तः २८तमदिनाङ्कं यावत् प्रचलितायां सङ्गोष्ठ्यां गरलीपरिसरस्य बहुभाषावित् प्रतिभागी डा. अशोकचन्द्रगौडशास्त्री "पूर्वोत्तरराज्यानां जनजातीनाम् उपभाषाणाम् (बोली) भाषाणां च विकासे संस्कृतस्य योगदानम्" इत्यस्मिन् विषये स्वकीयं शोधपत्रं प्रास्तौत्।

**डा. के.के. दलाई** – गरलीपरिसरे साहित्यविभागे वरिष्ठः सहाचार्यः अयं गौहाटीविश्वविद्यालये "पूर्वोत्तरराज्येषु पौराणिकी संस्कृतिः" इति विषये समायोजितायां राष्ट्रियसंगोष्ठ्यां भागं गृहीत्वा Manipur the land of jewls इति विषये स्वशोधपत्रं प्रास्तौत्।

**डा. नीलाभतिवारी** – भोपालपरिसरस्य शिक्षाशास्त्रविभागस्य सहायकाचार्येण तिवारिणा निलाभेन मईमासे नागालैण्डराज्ये दीमापुरे राष्ट्रियसंस्कृतसंस्थान-केन्द्रीयहिन्दीसंस्थानाभ्याम् आयोजितायां राष्ट्रियहिन्दीसंस्कृतसङ्गोष्ठ्याम् "असमियाभाषायां संस्कृतस्य प्रभावः" इति शीर्षकोपेतं शोधनिबन्धं प्रस्तुतम्। अनेन भोपाले बैरागढे आयोजिते प्रान्तीयशिबिरचालकप्रशिक्षणवर्गे "भाषायाः चत्वारि कौशलानि" इति विषयमाधृत्य विशिष्टं व्याख्यानं दत्तम्।

## राष्ट्रियसंस्कृतसंस्थानस्य आगामिनः कार्यक्रमाः

| | | |
|---|---|---|
| १०-१६.०८.११ | - | संस्कृतसप्ताह-कार्यक्रमाः |
| १३.०८.११ | - | संस्कृतमहोत्सवः |
| १६-१८.०९.११ | - | पालि-बौद्धपरम्पराविषये सङ्गोष्ठी, गङ्गटोक |
| २२-२४.०९.११ | - | युवमहोत्सवः, श्रीरणबीरपरिसरः, जम्मू |
| १५.१०.११ | - | स्थापनादिवसकार्यक्रमः, नवदेहली |
| नवम्बरमासान्ते, ११ | - | अखिलभारतीयशास्त्रीयस्पर्धा, दर्शनम्-संस्कृत-महाविद्यालयः अहमदाबाद् |
| ०५-१०.०१.१२ | - | १५तमं विश्वसंस्कृतसम्मेलनम्, नवदेहली |
| ०२-०४.०२.१२ | - | कौमुदीमहोत्सवः, नवदेहली |
| ०९-११.०३.१२ | - | अखिलभारतीयसंस्कृतनाट्योत्सवः, भोपालम् |

## परिसरीयच्छात्राणामुपलब्धयः

**बौद्धविद्या-विकास-विधायिन्याः विदेशयात्रायाः कृते शान्ताकुमारोनेगी वर्धापितः** - लखनऊपरिसरस्य बौद्धदर्शनाचार्यकक्षीयश्छात्रः शान्ताकुमारनेगी एकादश योरोपीयदेशानां (फिनलैण्ड, इस्तोनिया, लाटविया, नार्वे, जर्मनी, स्विटजरलैण्ड, आस्ट्रिया, हालैण्ड, हंगरी, फ्रांस, इंग्लैण्ड) बौद्धविद्या- विकासविधायिनीं यात्रामकरोत्। लद्दाख-हिमालयन्-बुद्धिस्ट्-एसोसियेशन्-शर्मण्यदेशीय-धर्मकीर्तिसंस्थानयोः संयुक्ततत्त्वावधाने प्रकल्पिते पूर्वोक्तयात्रादले श्रीशान्ताकुमारस्य चयनं हिमालयीयबौद्धधर्मानुप्राणितविविधलोककलानां प्रदर्शकत्वेन सञ्जातम्। मासैकव्यापिनीं तथोक्तां विदेशयात्रां निर्वर्त्य परावर्तितस्य शान्ताकुमारस्य वर्धापनं संस्थानकुलपतिना, परिसरप्राचार्येण, विभागाध्यक्षादिभिश्च ०४.०५.११ दिनाङ्के सगर्वमाचरितम्।

**शृङ्गेरीपरिसरीयच्छात्राणाम् उपलब्धयः** - १. नव्यन्याये शोधकार्यं कुर्वाणः 'अनन्तकृष्ण' इत्याख्यः परिसरीयच्छात्रः NET परीक्षायाम् उत्तीर्णोऽभवत्।

२. गणपति वि हेगडे (आचार्यद्वितीयवर्षीयः वेदान्तछात्रः) NET परीक्षायाम् उत्तीर्णः।

३. सुब्रह्मण्यभट्ट इत्याख्यः प्राक्तनवेदान्तच्छात्रः NET परीक्षायाम् उत्तीर्णः।

४. वर्षेऽस्मिन् एप्रैल्-मासे सम्पन्नायां वार्षिकपरीक्षायाम् आचार्यद्वितीयवर्षीयो वेदान्तच्छात्रः बसवराजप्याटीगौडरः संस्थानस्तरे सर्वोत्तमान् अङ्कान् प्राप्तवान्।

**जयपुरपरीसरच्छात्रणाम् उपलब्धिः**- वि.वि.अ. आयोगेन आयोजितपरीक्षाम् इमे जयपुरपरिसरच्छात्राः JRF प्राप्तवन्तः-१. कमलकान्तबालानः, २. दिनेशचन्द्रपाण्डेयः, ३. रौनककुमारः, ४. प्रियंकागर्गः च।

**जम्मूपरिसरीयच्छात्राणां संस्कृतनाट्य-नृत्यप्रशिक्षणकार्यशालायां भागग्रहणम्** - २६.०५.२०११ तः १६.०६.२०११ दिनाङ्कान्तं कालिदास-अकादमी-उज्जयिन्यामायोजितायां संस्कृतनाट्य-नृत्यप्रशिक्षणकार्यशालायाम् उपेन्द्रभार्गवः, ऋषिकुमारः, पुरुषोत्तमदासः, अनिलकुमारः, अरुणकुमारश्चेति विद्यार्थिनोऽभिनयादिप्रशिक्षणम् अधिगतवन्तः।



रामानुजदेवनाथाय स्मृतिचिह्नं समर्पयन् राधावल्लभत्रिपाठी

## कुलसचिवः कुलपतिर्जातः

राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवः आचार्यरामानुजदेवनाथः साम्प्रतं जयपुरस्थजगद्गुरुरामानन्दाचार्यसंस्कृतविश्वविद्यालयस्य कुलपतित्वेन अधिभारम् अगृह्णात्। २८ मई, २०११ दिनाङ्के अस्य महोदयस्य सौप्रस्थानिककार्यक्रमः नवदेहलीस्थराष्ट्रियसंस्कृतसंस्थानसभागारे समायोजितः। कार्यक्रमेऽस्मिन् आचार्यस्य रामानुजदेवनाथस्य प्रशासन-वैदुष्य-कार्यपटुत्वविषये संस्थानकुलपतिः आचार्यराधावल्लभ-त्रिपाठी, आचार्यरमाकान्तशुक्लः आचार्यः के.बी. सुब्बरायुडुः, डा. वाई. एस. रमेशः कू. वेङ्कटेशमूर्तिश्च स्वविचारान् प्रख्यापितवन्तः। कार्यक्रमेऽस्मिन् नवागतस्य कुलसचिवस्य आचार्य के. बी. सुब्बरायुडुमहोदयस्यापि स्वागतं कुलपतिप्रमुखसंस्थानसदस्यैः विहितम्। कार्यक्रमसञ्चालनं डा. रत्नमोहनझा अकरोत्।



के.बी. सुब्बरायुडुवर्याय स्वागतं व्याहरन् कुलपतिः राधावल्लभत्रिपाठी

> अलब्धं चैव लिप्सेत लब्धं रक्षेदवेक्षया।
> रक्षितं वर्द्धयेत्सम्यग्वृद्धं तीर्थेषु निक्षिपेत्॥
> -हितोपदेशः, २.८

> यस्य मित्रेण सम्भाषा यस्य मित्रेण संस्थितिः।
> यस्य मित्रेण संलापः ततो नास्तीह पुण्यवान्॥
> -हितोपदेशः, १.३९

## नामिताः नूतनाः प्रान्तसंयोजकाः

राष्ट्रियसंस्कृतसंस्थानेन समस्तेऽपि राष्ट्रे अनौपचारिकशिक्षणकेन्द्राणि सञ्चाल्यन्ते। तत्तत्प्रदेशेषु प्रान्तसंयोजकानां माध्यमेन एतानि केन्द्राणि क्रियान्वितानि जायन्ते। शैक्षिकसत्रस्य २०११-१२ कृते अधोनिर्दिष्टाः विद्वांसः कुलपतिवर्येण अनौपचारिकसंस्कृतशिक्षणस्य प्रान्तसंयोजकत्वेन चिताः वर्तन्ते–

| प्रान्तनाम | संयोजकनाम | सङ्केतः दूरवाणीसंख्या च |
|---|---|---|
| केरलप्रदेशः | १. डा. सुब्रह्मण्यशर्मा | अद्वैतवेदान्तविभागः, गुरुवायूरु-परिसरः, पो. – पुरनाट्टुक्करा, त्रिश्शूर – ६८० ५५१ (केरलम्) मो. ०९४४७८५९३४० |
| कर्णाटकप्रदेशः | २. डा. ए. पी. सच्चिदानन्दः | राष्ट्रियसंस्कृतसंस्थानम् (मा. वि.), राजीवगान्धीपरिसरः, शृङ्गेरी – ५७७ १३९, जिला – चिकमङ्गलूरु, (कर्नाटकम्) मो. ०९४४७८५९३४०, ०८२६५-२५०८९२ |
| तमिलनाडुप्रदेशः | ३. डा. आर्. रामचन्द्रन् | व्याख्याता, संस्कृतविभागः, रामकृष्णमिशन्, विवेकानन्द-महाविद्यालयः, मैलापुर, मद्रास – ०४ (तमिलनाडु) मो. ०९४४४०७९९५८ |
| आन्ध्रप्रदेशः | ४. डा. सुब्रह्मण्यम् | उपनिदेशकः, संस्कृतपरिषद्, उस्मानियाविश्वविद्यालयः, हैदराबाद, आन्ध्रप्रदेशः |
| महाराष्ट्रप्रदेशः | ५. आचार्यः रवीन्द्र-अम्बादासमुले | संस्कृतप्रगताध्ययनकेन्द्रम्, पुणेविद्यापीठम्, गणेशखण्डनम्, पुणे – ४११ ००५ (महाराष्ट्रम्) मो. ०९८६०९४१००६ |
| गुजरातप्रदेशः | ६. डा. रामप्रियः | प्राचार्यः दर्शनम्-संस्कृतमहाविद्यालयः, सरखेज्-गान्धीनगर हाई वे, पो. – चान्द्लोदिया, जिला – अहमदाबाद्, छारोडी, गुजरात – ३८२ ४८१ मो. ०९८२५१३०७६८, ०२७१७-२४२१४१ |
| राजस्थानप्रदेशः | ७. डा. पूर्णचन्द्रोपाध्यायः | अध्यक्षः, संस्कृतविभागः, राजकीयबिडलामहाविद्यालयः, भवानीमण्डी (राजस्थानम्) मो. ०९४१४४८९७२३ |
| मध्यप्रदेशः | ८. आचार्यः पी. एन्. शास्त्री | निदेशकः, कालिदास-संस्कृत-अकादमी, मध्यप्रदेशसंस्कृतिपरिषद्, उज्जैनम्, मध्यप्रदेशः |
| हरियाणाप्रदेशः | ९. आचार्यः सुरेन्द्रमोहनमिश्रः | संस्कृतविभागः, कुरुक्षेत्रविश्वविद्यालयः, कुरुक्षेत्रम् – १३६ ११९ (हरियाणा) मो. ०९८९६०८६५७९ |
| पञ्जाबप्रदेशः | १०. डा. इन्द्रमोहनसिंहः | संस्कृतविभागः, पञ्जाबविश्वविद्यालयः, पटियाला (पञ्जाब) मो. ०९८१५९६६२८७ |
| हिमाचलप्रदेशः | ११. डा. भक्तवत्सलशर्मा | प्राचार्यः, सनातनधर्म-आदर्शसंस्कृतमहाविद्यालयः, डोहगी, ऊना, हिमाचलप्रदेशः – १७४ ३०७ मो. ०९४१८०९४२९३, ०१९७५-२६२०३७ |
| जम्मू-कश्मीरप्रदेशः | १२. आचार्यः विश्वमूर्तिशास्त्री | प्राचार्यः, श्रीरणवीरपरिसरः, कोट भलवाल, जम्मू – १८१ १२२ (जम्मू-कश्मीर) मो. ०१९१-२६२३०९० |
| देहलीप्रदेशः | १३. डा. हरिराममिश्रः | विशिष्टसंस्कृताध्ययनकेन्द्रम्, जवाहरलालनेहरूविश्वविद्यालयः, नवदेहली मो. ०९९७११८७२८४ |
| उत्तराखण्डप्रदेशः | १४. डा. बुद्धदेवशर्मा | सचिवः, संस्कृतपरिषत् (उत्तराञ्चलसंस्कृताकादमी) रानीपुर झाल, नेशनल हाइवे, हरिद्वारम्, (उत्तराखण्ड) मो. ०९४११११११८५ |
| उत्तरप्रदेशः | १५. डा. लक्ष्मीनिवासपाण्डेयः | प्रवाचकः, शिक्षाशास्त्रविभागः, राष्ट्रियसंस्कृतसंस्थानम्, (मा. वि.), लखनऊ-परिसरः, विशालखण्डनम् – ४, गोमतीनगरम्, लखनऊ – २२६ ०१० (उत्तरप्रदेशः) मो. ०९८३८५५०११२ |
| बिहारप्रदेशः | १६. डा. श्रीप्रकाशपाण्डेयः | प्रवाचकः, डा. बी.आर्. अम्बेडकर-विश्वविद्यालयः, क्वा. नं. – २३, विश्वविद्यालयपरिसरः, मुजफ्फरपुरम् – ०१ (बिहार) मो. ०९४३००१३७१९ |
| पश्चिमबङ्गप्रदेशः | १७. डा. तन्मयकुमारभट्टाचार्यः | ए. एफ्. – १५९, रवीन्द्र पल्ली, पत्रालयः – प्रफुल्लकाननम्, कृष्णपुरम्, कोलकाता – ७०० १०१ मो. ०९४३३३५१५८२, ०३३-२५७१०२५७ |
| उत्कलप्रदेशः | १८. डा. सुकान्तकुमारसेनापतिः | राष्ट्रियसंस्कृतसंस्थानम् (मा. वि.) श्रीसदाशिवपरिसरः, पुरी-७५२००१ (उड़ीसा) मो. ०९९३७४२७०९४ |
| असमप्रदेशः | १९. डा. नृपेन्द्रनाथशर्मा | नार्थ ईस्ट क्षेत्रम्, पञ्चजन्या, लक्ष्मीनगरम्, राधा-गोविन्द बरूवा मार्गः, गुवाहाटी, असम-७८१००५ मो. ०९९५४०७६५१५ |

सर्वेभ्यः स्वागतम्




समापनसमारोहे मञ्चासीनाः वामतः गुरुचरणसिंहनेगी, विजयकुमारजैनः, राधावल्लभत्रिपाठी, अनिताभटनागरजैन, सुरेन्द्रझाः च

## लखनऊपरिसरीयो वृत्तः

**पालिप्राकृतसंस्कृतच्छायाप्रशिक्षणं प्रमाणपत्रवितरणञ्च** – ०२-०४.०५.२०११ इत्यवधौ परिसरेऽस्मिन् त्रिदिवसीया पालि/प्राकृतसंस्कृतच्छायाविषयिणी काचित् कार्यशाला समायोजिता। तत्र तद्विषयकं प्रशिक्षणं पुरस्कारवितरणञ्चेति सम्पन्नम्। प्रशिक्षकेषु वाराणसीतः पद्मश्रीविभूषितः आचार्यः रामशङ्करत्रिपाठी आचार्यः एन.एच. सामतानी च, नालन्दातः आचार्यः उमाशङ्करव्यासः, पूनातः डा. कमलकुमारजैनः, स्थानीयाश्च केचिदाचार्याः संस्कृतच्छायापरां सूक्ष्मेक्षिकां प्रकटितवन्तः। तृतीयदिवसस्यापराह्ने प्रमाणपत्रवितरणसमारोहे मुख्यातिथित्वेन मानवसंसाधनविकासमन्त्रालयस्य भाषिकसंयुक्तसचिवा डा. अनीताभटनागरजैनमहोदया, सभाध्यक्षत्वेन संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठी च निजेनोद्बोधनेन प्रमाणपत्रवितरणेन च कार्यक्रमं समेधितवन्तौ। परिसरस्य प्राचार्यः आचार्यसुरेन्द्रझा अतिथीनां स्वागतं व्याहरत्। पालिपरीक्षोत्तीर्णाः ४१ छात्रास्तथा प्राकृतपरीक्षोत्तीर्णाः २७ छात्रास्तत्र प्रमाणपत्राणि लब्धवन्तः। पालिविषये सुश्री सोनल प्रदीपद्विवेदी च, प्राकृतविषये सुश्री सरस्वती हरशान्तश्च क्रमशः प्रथमद्वितीयस्थानोत्तीर्णाः एते प्रतीकचिह्नप्रदानेनापि सभाजिताः। अध्यापनकर्मकौशले डा. गुरुचरणसिंहनेगी डा. पत्रिका जैन इत्यनयोः सम्माननमपि कार्यक्रमेऽस्मिन् विहितम्। कार्यक्रमान्ते बौद्धदर्शनविभागाध्यक्षः आचार्यविजयकुमारजैनः धन्यवादज्ञापनम् अकरोत्।

## श्रीरणवीरपरिसरवार्ता

**परीक्षाः** – ०१.०४.२०११ तः १७.०५.२०११ दिनाङ्कान्तं प्राक्शास्त्रि-शास्त्रि-आचार्य-शिक्षाशास्त्रि-शिक्षाचार्यपरीक्षाः परिसरप्राचार्यस्य विश्वमूर्तिशास्त्रिमहोदयस्याध्यक्षतयामक्षतं समपद्यन्त।

**राष्ट्रियमूल्याङ्कनप्रत्यायनसमितिगठनम्** – राष्ट्रियमूल्याङ्कनप्रत्यायनसमितिकर्तृकं निरीक्षणमुद्दिश्य २२.०६.२०११ दिनाङ्के श्रीरणवीरपरिसरे चतुस्सदस्यात्मिका समितिरेका सङ्घटिता। समितिरेयं प्रतिसप्ताहमुपवेशनं विधाय परिसरकार्यप्रगतिविवरणं प्राचार्याय प्रदास्यतीति।

**परिचयपुस्तिकासंरचनासम्बद्धमुपवेशनम्** – परिचयपुस्तिका (Hand-Book) संरचनार्थं २४.०६.२०११ दिनाङ्केऽधिपरिसरमुपवेशनं सम्पन्नं, यस्मिन् सप्राचार्यं शिक्षाशास्त्रविभागाध्यक्षः आचार्यः एम्. चन्द्रशेखरः, शारीरिकशिक्षाविभागाध्यक्षः श्री रमेशसिंहः, आंग्ल-विभागाध्यक्षः श्रीशरत्चन्द्रशर्मा, साहित्यविभागाध्यक्षः डा. सतीशकपूरश्च भागं गृहीतवन्तः।

**साक्षात्काराः** – २८.०६.२०११ तः ३०.०६.२०११ दिनाङ्कान्तम् अंशकालिकव्याख्यातृपदे विविधविषयेषु साक्षात्काराः समपद्यन्त।



वार्षिकोत्सवे राष्ट्री-पत्रिकायाः लोकार्पणदृश्यम्

## भोपालपरिसरोदन्तः

**वार्षिकोत्सवः** – भोपालपरिसरे नूतनप्रेक्षागारस्य ग्रन्थागारस्य च लोकार्पणम् एवञ्च वार्षिकोत्सवः १६.०४.२०११ दिनाङ्के भवभूतिप्रेक्षागारे हर्षोल्लासाभ्यां समायोजितः। राष्ट्रियसंस्कृतसंस्थानस्य कुलपतेः आचार्यराधावल्लभत्रिपाठिनः मुख्यातिथित्वे निरालानगरस्य भोपालस्थस्य प्रसिद्धसाहित्यकारस्य आचार्यविजयबहादुरसिंहस्य आध्यक्ष्ये, केन्द्रीयलोक-निर्माणविभागस्य अधीक्षण-अभियन्तुः श्रीअरविन्दकुमारवर्मणः विशिष्टातिथित्वे वैदिकमङ्गला-चरणपूर्वकं कार्यक्रमोऽयं प्रारब्धः। कार्यक्रमारम्भे वैदिक-लौकिकमङ्गलाचरणानन्तरं परिसर-प्राचार्येण आजादमिश्रेण अभिनन्दनवचांसि व्याहरन् परिसरस्य वार्षिकप्रतिवेदनं प्रस्तुतम्।

**ज्योतिषपरिचयपाठ्यक्रमस्य सञ्चालनम्** – ज्योतिषपरिचयपाठ्यक्रमस्य त्रैमासिकं शिक्षणमिदं परिसरे ०३.०३.२०११ तः ०९.०५.२०११ दिनाङ्कान्तं समायोजितम्। पाठ्यक्रमेऽस्मिन् विंशतिः प्रतिभागिनः भागं गृहीतवन्तः। चत्वारोऽध्यापकाः अत्र अध्यापितवन्तः- डा. हंसधरझाः, डा. पी. वी. बी. सुब्रह्मण्यम्, डा. अशोकथपलियालः, श्री अवधेशश्रोत्रियश्च। ज्योतिषपरिचयपाठ्यक्रमस्य समापनसमारोहः ०९.०५.२०११ दिनाङ्के सुष्ठु सम्पन्नः। समापनसमारोहेऽस्मिन् परिसरप्राचार्येण आजादमिश्रेण वर्तमानसन्दर्भे ज्योतिषशास्त्रस्य प्रासङ्गिकताविषये निगदितम्। समारोहेऽस्मिन् डा. वेदनारायणप्रमुखाः परिसरीयाः प्राध्यापका उपस्थिता आसन्। कार्यक्रमेऽस्मिन् ज्योतिषशास्त्रस्य जिज्ञासवः प्रतिभागिनः स्वीयमभिप्रायं प्रकटितवन्तः। परिसरप्राचार्येण आजादमिश्रेण सर्वेषां प्रतिभागिनां कृते आशीर्वादः प्रमाणपत्रं च प्रदत्तम्।



प्रमाणपत्रवितरणस्य किञ्चन दृश्यम्

परिसरवार्ता

## जयपुरपरिसरवृत्तान्तः

### केन्द्रीयमूल्याङ्कनम्

वर्षेऽस्मिन् केन्द्रीयमूल्याङ्कनकार्यं जयपुरपरिसरे सुसम्पन्नम्। विविधपरिसरीयाः विभिन्नविभागीयाश्च शिक्षकाः अस्मिन् परिसरे समुपस्थाय मूल्याङ्कनकार्यं सम्पादयन्।

### विविधवार्ताः

०६ मई, २०११ दिनाङ्के राजनीतिविज्ञानविषयस्य सहायकाचार्यारूपेण डा. सीमा अग्रवाल परिसरेऽस्मिन् कार्यभारम् अगृह्णात्। नूतनरूपेण उद्घाटिते सर्वदर्शनविभागे १० मई, २०११ दिनाङ्के डा. सत्यम् कुमारी कार्यभारं स्वीकृतवती। ३१ मई, २०११ दिनाङ्के शिक्षाशास्त्रविभागस्य आचार्यस्य डा. टी.के. शर्मणः सेवानिवृत्तिकार्यक्रमः समाचरितः।



केन्द्रीयमूल्याङ्कनार्थं समवेतानां विदुषां समूहचित्रम्



डा. टी.के. शर्मणः सेवानिवृत्तिकार्यक्रमस्य किञ्चन दृश्यम्

## राजीवगान्धीपरिसरस्य वार्ताः

**अभिनन्दनम् –** जूनमासे प्रकटितपरिणामायां २०११ वर्षीयपूर्वशिक्षाशास्त्रिपरीक्षायां राजीवगान्धीपरिसरे सञ्चालिते पूर्वशिक्षाशास्त्रिप्रशिक्षणवर्गे प्रशिक्षणं प्राप्तवत्सु ३० छात्रेषु २७ छात्राः उत्तीर्णतां प्रापुः। प्रशिक्षणवर्गस्यैतादृशम् उत्तमं साफल्यमुपलक्ष्य प्रशिक्षणवर्गसञ्चालकः डा. गणेश टि. पण्डितः प्राचार्यप्रमुखैः परिसरसदस्यैः भृशमभिनन्दितः।

**स्थानान्तरणम् –** १. राजीवगान्धीपरिसरस्य साहित्यविभागाध्यक्षः उपाचार्यः डा. कृष्णन्नम्बूदिरी गुरुवायूर्परिसरम्। २. राजीवगान्धीपरिसरस्य वेदान्तविभागीयः सहायकाचार्यः डा. भगवान् सामन्तरायः पुरीस्थं सदाशिवपरिसरं च स्थानपरिवर्तनं प्राप्य अगच्छताम्। ३. गुरुवायूर्परिसरस्य शिक्षाविभागीयः सहायकाचार्यः डा. वेङ्कटरमणभट्टः राजीवगान्धीपरिसरं समागच्छत्।

**मुक्तस्वाध्यायकेन्द्रस्य सम्पर्ककक्ष्याः –** परिसरे मुक्तस्वाध्यायकेन्द्रस्य द्वितीयसम्पर्ककक्ष्याः २८.०३.११ तः ११.०४.११ पर्यन्तं प्राचलन्।

## गरलीपरिसरवृत्तान्तः

**वार्षिकी परीक्षा–** १ अप्रैल २०११ दिनाङ्कात् संस्थानस्य वार्षिकी परीक्षा प्रारब्धा। पूर्वम् प्राक्शास्त्रिकक्षायाः, ततः शास्त्र्याचार्यकक्षयोः परीक्षा जाता। मईमासे सप्तमदिनाङ्कं यावत् वार्षिकी परीक्षा सम्पन्ना। ततः नवमदिनाङ्कात् अष्टादशदिनाङ्कं यावत् सत्रार्द्धपरीक्षा (सेमेस्टर) सम्पन्ना।

**नवप्राचार्याय स्वागतम्–** मईमासे कुलसचिवस्य आचार्यस्य के.बी. सुब्बरायुडुमहाभागस्य गरलीपरिसरे भव्यं स्वागतमभूत्। ततः ०९.०५.२०११ तमे दिनाङ्के लखनऊतः डा. लक्ष्मीनिवासपाण्डेयः परिसरेऽस्मिन् प्राचार्यत्वेन समागतः। किन्तु सः ३१.०५.२०११ तमे दिनाङ्के गरलीतः पुनः लखनऊपरिसरे पूर्वकार्यभारं स्वीकृतवान्। ततश्च पुरीपरिसरात् आचार्यः हरेकृष्णमहापात्रः प्राचार्यत्वेन गरलीपरिसरे समागतः। साम्प्रतमत्रायं परिसरे प्राचार्यकार्यधुरं वहन् विराजते। वर्तमानप्राचार्येण आचार्य-महापात्रेण सहैव तदीया धर्मपत्नी श्रीमती दाशगौरप्रियाऽपि पुरीतो गरलीपरिसरे दर्शनविषये सहाचार्यत्वेन समागता।



हरेकृष्णमहापात्राय स्वागतं व्याहरन् लक्ष्मीनिवासपाण्डेयः

**स्थानान्तरणम्–** मईमासे व्याकरणप्राध्यापकस्य (अंशकालिकस्य) डा. उमेशचन्द्रमिश्रस्य स्थानान्तरणं पुरीस्थसदाशिवपरिसरे जातम्। सममेव च डा. उमेशकुमारपाण्डेयस्य (अंशकालिकस्य ज्यौतिषप्राध्यापकस्य) स्थान्तरणं लखनऊपरिसरे जातम्। अस्मिन्नेव मासे एकविंशदिनाङ्कात् ग्रीष्मावकाशः प्रवृत्तः। ततः गरलीपरिसरात् डा. मदनमोहनपाठकस्य (ज्यौतिषविभागे उपाचार्यस्य) स्थानान्तरणं लखनऊपरिसरे जातम्। गरलीपरिसरे वरिष्ठलिपिकस्य श्रीसञ्जयमिश्रस्य च स्थानान्तरणं के.जे. सोमैयापरिसरे मुम्बय्यां जातम्।

**सम्भाषणशिबिरम् अन्यगतिविधयश्च –** जूनमासस्य २१तमे दिनाङ्के गरलीपरिसरस्य नूतनसत्रारम्भोऽभूत्। अस्मिन्नेव दिने गरलीपरिसरे ज्यौतिषविभागे द्वौ नूतनो प्राध्यापकौ समागतौ- श्रीअनिलप्रतिहस्तः, डा. मनोजश्रीमालश्च। सत्रारम्भे प्रवेश-प्रक्रिया प्रारब्धाऽभूत्। परिसरे विद्यारम्भापूर्वं जूनमासस्य ३० दिनाङ्के सरस्वतीपूजनं परिसर-प्राचार्यः प्रो. हरेकृष्णमहापात्रः परिसरसदस्याश्च महता उल्लासेन श्रद्धया च समपादयन्। ततश्च प्रवेश-प्रक्रियया सहैव ३० जूनदिनाङ्कात् जुलाईमासस्य अष्टादशदिनाङ्कं यावत् परिसरच्छात्राणां कृते संस्कृत-सम्भाषणशिबिरस्य कार्यक्रमः प्राचार्यस्य हरेकृष्णमहापात्रस्य निर्देशने डा. विजयपालशास्त्रिणश्च संयोजकत्वे प्रचलितम्।

शनिवार, 7 मई 2011 | नईदुनिया 13



राष्ट्रपति प्रतिभा पाटिल शुक्रवार को राष्ट्रपति भवन में आयोजित संस्कृत सम्मान समारोह के दौरान प्रोफेसर अ... को वर्ष 2008 के लिए संस्कृत भाषा के लिए प्रमाण पत्र देती हुईं। फोटो ...ईदुनिया

हिन्दुस्तान 08
लखनऊ • गुरुवार • 05 मई 2011



राष्ट्रीय संस्कृत संस्थान मे चल रहे पालि/प्राकृत संस्कृत... बुधवार को समापन हो गया। इस अवसर पर पालि भा... 27 उत्तीर्ण विद्यार्थियों को प्रमाण पत्र प्रदान किए गए। ... वाली सोनल सिंह व द्वितीय स्थान पाने वाले प्रदीप ... स्थान पर रही सरस्वती आर्या व द्वितीय स्थान पर ... प्रमाण पत्र और प्रतीक चिह्न दिया गया।




राष्ट्रीय संस्कृत संस्थान, गोमती नगर में बुधवार को प्रशिक्षण कार्यक्रम के बाद सम्मानित किये गये आचार्य एवं छात्र-छात्रायें

## संस्कृत संस्थान में 68 छात्रों को मिले प्रमाणपत्र

लखनऊ। राष्ट्रीय संस्कृत संस्थान में तीन दिवसीय संस्कृत की पालि और प्राकृत भाषा में 'संस्कृतच्छाया' प्रशिक्षण सम्पन्न हुआ। दो मई से शुरू हुए इस प्रशिक्षण के आखिरी दिन बुधवार को 68 छात्र-छात्राओं को प्रमाण पत्र प्रदान किए गए। 'पालि' भाषा में सोनल सिंह ने प्रथम स्थान हासिल किया और 'प्राकृत' में सरस्वती आर्या ने बाजी मारी।

गोमती नगर स्थित राष्ट्रीय संस्कृत संस्थान में तीन दिवसीय प्रशिक्... ...वार को सम्पन्न हुआ ... विद्व... छा... अ...

**सम्मानित**

**सोनल व सरस्वती को मिला प्रथम स्थान, तीन दिवसीय कार्यक्रम में आए विद्वान**

आवश्यकता है। इस प्रशिक्षण से भी छात्र लाभान्वित हुए हैं। मानव संसाधन विकास मंत्रालय की संयुक्त सचिव डॉ. अनीता भटनागर मुख्य अतिथि के रुप में उपस्थित रहीं। उन्होंने ऐसे कार्यक्रमों को बढ़ावा देने वाले संस्थानों को पूरा सहयोग देने का आश्वासन दिया। इसके अलावा पालि में 41 छात्र-छात्राओं को प्रमाण पत्र वितरित किए गए। इसमें छात्रा सोनल सिंह ने प्रथम स्थान हासिल किया। दूसरे स्थान पर छात्र प्रदीप द्विवेदी रहे। वहीं प्राकृत में 27 छात्रों को प्रमाण पत्र दिए गए। इसमें छात्रा ...ती आर्या को प्रथम व हर्षन्त वीर ... मिला।

वृत्तदर्पणे संस्थानम्

अमर उजाला MyCity लखनऊ IV
लखनऊ, 5 मई 2011



**छात्रो को मिले प्रमाणपत्र** आकड़े बताते है कि विश्व में हर दिन एक भाषा-बोली का लोप हो रहा है। हमें पाली-प्राकृत भाषा को बचाने का प्रयास करना चाहिए। गोमती नगर के राष्ट्रीय संस्कृत संस्थान में पाली-प्राकृत-संस्कृत छाया पर चल रही तीन दिवसीय कार्यशाला के अंतिम दिन बुधवार को ये बातें मुख्य अतिथि संयुक्त सचिव मानव संसाधन विकास मंत्रालय डॉ. अनीता भटनागर जैन ने कहीं। प्रतिभागियों को प्रमाण पत्र बांटे गए।

नई दिल्ली, 7 मई 2011
दैनिक जागरण V



संस्कृत के प्रसिद्ध साहित्यकार डॉ. रमाकांत शुक्ला को प्रमाण पत्र देतीं राष्ट्रपति प्रतिभा पाटिल। जागरण

## डॉ. रामाकांत शुक्ला को राष्ट्रपति ने किया सम्मानित

पश्चिमी दिल्ली, जासं : प्रसिद्ध संस्कृत साहित्यकार डॉ. रामाकांत शुक्ला को राष्ट्रपति डॉ. प्रतिभा पाटिल ने पुरस्कार देकर सम्मानित किया। उन्हें यह सम्मान संस्कृत भाषा में उत्कृष्ट योगदान देने के लिए दिया गया है। राष्ट्रपति ने उन्हें सम्मान प्रमाण पत्र, शॉल व पांच लाख रुपये की राशि प्रदान की।

श्री शुक्ला उत्तम नगर स्थित वाणी विहार में रहते हैं। राष्ट्रपति के हाथों सम्मान पाने पर उन्होंने खुशी जाहिर की है। डॉ. रामाकांत शुक्ला संस्कृत में 19 किताबें लिख चुके हैं, जिसमें 'भाति में भारतम्' काफी प्रसिद्ध रचना है। उनकी रचनाएं कई राज्यों की पाठ्यक्रमों में छात्रों को पढ़ाई जाती है। साथ ही स्नातक व परास्नातक में भी छात्र की रचनाएं पढ़कर संस्कृत भाषा का ज्ञान अर्जित कर रहे हैं। उन्हें यह पुरस्कार वर्ष 2009 के लिए दी गई है, जिसके बाद साहित्य जगत के कई विद्वानों ने खुशी जाहिर की है और उन्हें बधाई दी।

4 | दैनिक जागरण लखनऊ, 5 मई 2011 लखनऊ जागरण



## वितरण समारोह

राष्ट्रीय संस्कृत संस्थान में चल रही तीन दिवसीय पालि/प्राकृत संस्कृतच्छासया प्रशिक्षण कार्यशाला बुधवार को समाप्त हो गई। इस अवसर पर प्रशिक्षुओं को पालि/प्राकृत प्रमाणपत्र वितरित किए गए। समारोह की अध्यक्षता संस्थान के कुलपति आचार्य राधावल्लभ त्रिपाठी ने की और मुख्य अतिथि मानव संसाधन विकास मंत्रालय की संयुक्त सचिव डॉ. अनीता भटनागर जैन थीं

# राष्ट्रियसंस्कृतसंस्थानम्

बहुपरिसरीयः बृहत्तमः मानितसंस्कृतविश्वविद्यालयः
( भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनः )
५६-५७, इन्स्टीट्यूशनल् एरिया, जनकपुरी, नवदेहली-११० ०५८

दूरशिक्षापरिषदः मान्यतायुत-पाठ्यक्रमाः!

## मुक्तस्वाध्यायपीठम्

(Institute of Distance Education)

### दूरस्थशिक्षाविधिना पाठ्यक्रमाः

#### प्राक्शास्त्री ( +2 )

अवधिः- वर्षद्वयम्। अर्हता- ससंस्कृतं दशमकक्षोत्तीर्णता तत्समकक्षोत्तीर्णता वा।

#### शास्त्री ( बी.ए. )

(व्याकरणे साहित्ये फलितज्यौतिषे च) अवधिः-वर्षत्रयम्। अर्हता-प्राक्शास्त्री/उत्तरमध्यमा/ससंस्कृतम् इन्टरमीडिएट्/तत्समकक्षोत्तीर्णता।

#### आचार्यः ( एम्.ए. )

(व्याकरणे साहित्ये च) अवधिः-वर्षद्वयम्। अर्हता- ससंस्कृतं त्रिवर्षीयस्नातककक्षोत्तीर्णता तत्समकक्षोत्तीर्णता वा।*

#### संस्कृतावतरणी

विना संस्कृतं दशमकक्षोत्तीर्णानां प्राक्शास्त्रिप्रवेशाय एषः सेतुपाठ्यक्रमः। अवधिः - 6 मासाः।

**संस्कृतभाषाव्यवहारस्य प्राथमिकं सोपानम् आरोढुम् इच्छवः अन्ये संस्कृताभिमानिनः अपि अत्र प्रवेष्टुमर्हाः।**

#### संस्कृतावगाहनी

विना संस्कृतं द्वादशकक्षोत्तीर्णानां शास्त्रिप्रवेशाय एषः सेतुपाठ्यक्रमः। अवधिः-एकवर्षम्।

**संस्कृतभाषाव्यवहारस्य प्राथमिकं स्वरूपं ज्ञातुं, व्यवहारे दक्षतां प्राप्तुं, रामायण-भगवद्गीतादिग्रन्थान् अवगन्तुं सामर्थ्यं प्राप्तुं च तीव्रेच्छां धरन्तः संस्कृताध्ययनासक्ताः अन्ये अपि अत्र प्रवेष्टुमर्हाः।**

**आचार्यप्रवेशपरीक्षा- २१.०८.२०११ दिनाङ्के, ११.०० वादने**

* विना संस्कृतं स्नातकपरीक्षायां/तत्समकक्षपरीक्षायाम् उत्तीर्णः किन्तु प्रकारान्तरेण (स्वाध्यायबलेन/गुरुमुखात्) शास्त्रिस्तरीय-शास्त्रज्ञानसम्पन्नः सम्बद्धशास्त्रस्य (व्याकरणस्य/साहित्यस्य) आचार्य प्रवेशपरीक्षाम् उत्तीर्य एव आचार्यकक्षां प्रवेष्टुमर्हति।

* एकस्मिन् शास्त्रे शास्त्रिकक्षाम्/आचार्यकक्षाम् उत्तीर्य अपरस्मिन् शास्त्रे आचार्यं पिपठिषुः ईप्सितशास्त्रे आचार्यप्रवेशपरीक्षाम् उत्तीर्य नामाङ्कनं कारयितुं प्रभवति।

**आवेदनपत्रं विवरणिका च Director, Mukta Swadhyayapeetham, New Delhi इत्यस्य नाम्ना डी.डी. प्रस्तुत्य अधोलिखितेभ्यः स्वाध्यायकेन्द्रेभ्यः संस्थानस्य विश्वव्यापिजालपुटात् (www.sanskrit.nic.in) च प्राप्तुं शक्यते।**

● समन्वयकः, स्वाध्यायकेन्द्रम्, राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.), ५६-५७, इन्स्टीट्यूशनल एरिया, जनकपुरी, **नवदेहली,** ● समन्वयकः, स्वाध्यायकेन्द्रम्, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि.) गङ्गानाथझापरिसरः, चन्द्रशेखर-आजादपार्क, इलाहाबादम् **( उत्तरप्रदेशः )** ● समन्वयकः, स्वाध्यायकेन्द्रम्, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि.) सदाशिवपरिसरः, पुरी **( उड़ीसा )** ● समन्वयकः, स्वाध्यायकेन्द्रम्, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि.) रणवीरपरिसरः, कोट-भलवल, जम्मू **( जम्मू-कश्मीरम् )** ● समन्वयकः, स्वाध्यायकेन्द्रम्, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि.) गुरुवायूरुपरिसरः, पुरनाट्टुकरा, त्रिचूर, **( केरलम् )** ● समन्वयकः, स्वाध्यायकेन्द्रम्, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि.) जयपुरपरिसरः, त्रिवेणीनगरम्, गोपालपुरा बाईपास, जयपुरम् **( राजस्थानम् )** ● समन्वयकः, स्वाध्यायकेन्द्रम्, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि.) विशालखण्डः-४, गोमतीनगरम्, लखनऊ **( उत्तरप्रदेशः )** ● समन्वयकः, स्वाध्यायकेन्द्रम्, राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.) राजीवगान्धीपरिसरः, शृङ्गेरी, चिकमगलूरु **( कर्णाटकम् )** ● समन्वयकः, स्वाध्यायकेन्द्रम्, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि.) गरलीपरिसरः, ग्राम-गरली, ब्लॉक-परागपुर, तहसील-देहरा, जिला-काङ्गडा **( हिमाचलप्रदेशः )** ● समन्वयकः, स्वाध्यायकेन्द्रम्, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि.) भोपालपरिसरः, संस्कृतमार्गः, बागसेवनिया, भोपालम् **( मध्यप्रदेशः )** ● समन्वयकः, स्वाध्यायकेन्द्रम्, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि.) क.जे.सोमैया-परिसरः, द्वितीयतलम्, एस्.आई.एम्.एस्.आर्. भवनम्, विद्याविहारः, मुम्बई **( महाराष्ट्रम् )**।

➤ आवेदनपत्रस्य विवरणिकायाः च शुल्कम् – **साक्षात्** - रू. ३००/-, (अ.सू.जा./अ.सू.ज.जा./विक.- रू. २५०/-)
**पत्रालयमाध्यमेन** - रू. ३५०/-, (अ.सू.जा./अ.सू.ज.जा./विक.- रू. ३००/-)।

## दूरशिक्षामाध्यमेन संस्कृताध्ययनाय स्वर्णावसरः

➤ प्रपूरितावेदनपत्रं समर्पयितुम् अन्तिमदिनाङ्कः – विना विलम्बशुल्कम् ३१-०७-२०११।
शतस्य रूप्यकाणां (रू. १००/-) विलम्बशुल्कसहितम्-१६-०८-२०११।

–निदेशकः

Sanskritavarta : Quarterly News Bulletin of Rashtriya Sanskrit Sansthan Vol.III Issue No.12 Pub. by the Registrar for Rashtriya Sanskrit Sansthan, 56-57, Institutional Area, Janakpuri, New Delhi-110058 & Printed at D.V. Printers, 97-U.B. Jawahar Nagar, Delhi-110007